Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# संस्कृत-श्लोक-संग्रहः

## (प्रथम भाग)

संग्राहक—
पूज्य जैनाचार्य श्री १००८
श्री धर्मदासजी म. सा की
सम्प्रदाय के शान्तस्वभावी
प्र. मु. श्री ताराचन्द्रजी
म. सा. के आज्ञानुवर्ती
कविरत्न पं. मु. श्री
सूर्य मुनिजी
म. साहब

प्रकाशक—
श्री धर्मदास जैन
मित्र मंडल,
रतलाम
(मालवा)

प्रथमावृत्ति
१०००

वी. सं. २४६६
वि. सं. १९९६

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# संस्कृत-श्लोक संग्रहः

## ॥ मंगलाचरणम् ॥

१

अर्हंतो भगवन्त इन्द्रमहिताः सिद्धाश्च सिद्धिस्थिताः ।
आचार्या जिनशासनोन्नतिकराः पूज्या उपाध्यायकाः ॥
श्रीसिद्धान्तसुपाठका मुनिवरा रत्नत्रयाराधकाः ।
पञ्चैते परमेष्ठिनः प्रतिदिनं कुर्वन्तु नो मङ्गलम् ॥

२

वीरःपार्श्वनमी सुपार्श्वसुविधीश्रेयांसमल्लीशशी ।
नेमिर्नाभिजवासुपूज्यविमलौः पद्मप्रभः शीतलः ॥
कुन्थुः शान्त्यभिनन्दनार्हन्मुनिर्धर्मोजितः संभवोऽ ।
नन्तःश्रीसुमतिश्च तीर्थपतयः कुर्वन्तु नो मङ्गलम् ॥

३

नाभेयाऽजितसंभवाभ्च्युतभवाः श्रीसंवरस्यात्मज-
स्तीर्थेशः सुमतिः कुशेशयरुचिः षष्ठः सुपार्श्वस्तथा ॥
श्रीचन्द्रप्रभतीर्थकृच्च सुविधिःश्रीशीतलःसौख्यदः ।
श्रेयांसप्रभुवासुपूज्यविमलाः कुर्वंतु नो मङ्गलम् ॥

४

शक्त्याऽनन्तजिनो विनष्टवृजिनो धर्मश्चिदानंददः ।
शान्तिःकुन्थुररश्च मल्लिररिघस्त्रैलोक्यचिन्तामणिः ॥
अर्हन् श्रीमुनिसुव्रतो नमिविभुः शुद्धस्वरूपस्थितो ।
नेमिःपार्श्वजिनश्च वीरभगवान् कुर्वंतु नो मङ्गलम् ॥

५

कैलाशे प्रथमो गतः शिवपदं चम्पापुरि द्वादशः ।
द्वाविंशो भगवान्गतःशिवपुरं श्रीरैवताख्ये गिरौ ॥
श्रीपावापुरपत्तनेऽन्तिमजिनः शैले समेताभिधे ।
शेषा विंशतयो गताःशिवपथं कुर्वन्तु नो मङ्गलम् ॥

६

इन्द्राग्न्याऽऽशुगभूतयः समकुला व्यक्तःसुधर्मा तथा ।
षष्ठो मण्डितपुत्रको गणधरो मौर्यात्मजः सप्तमः ॥
श्रेयो दृष्टिरकम्पितो गुणमणिर्धीरोऽचलभ्रातृकः ।
मेतार्यो दशमः प्रभासगणभृत्कुर्वन्तु नो मङ्गलम् ॥

७

ब्राह्मी चंदन बालिका भगवती राजीमती द्रौपदी ।
कौशल्या च मृगावती च सुलसा सीता सुभद्रा शिवा ॥
कुन्ती शीलवती नलस्य दयिता चूडा प्रभावत्यपि ।
पद्मावत्यपि सुन्दरी प्रतिदिनं कुर्वन्तु नो मंगलम् ॥

८

वीरस्सर्वसुरासुरेन्द्रमहितो वीरं बुधाः संश्रिताः ।
वीरेणाभिहतः स्वकर्मनिचयो वीराय नित्यं नमः ॥
वीरात्तीर्थमिदं प्रवृत्तमतुलं वीरस्य घोरं तपो ।
वीरे श्रीधृतिकीर्तिकान्ति निचय; श्रीवीर ! भद्रं दिश ॥

९

प्रोद्यत् सूर्यसमं सुरासुरनरैः सं—सेवितं निर्मलं ।
श्रीमत्पार्श्वजिनं जिनं जिनपतिं कल्याणवल्लीघनम् ॥
तीर्थेशं सुरराजवंदितपदं लोकत्रये पावनं ।
वन्देऽहं गुणसागरं सुखकरं विश्वैकचिंतामणिम् ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

१०

नाभेयादिजिना प्रशस्तवदना ख्याताश्चतुर्विंशतिः ।
श्रीमन्तो भरतेश्वरप्रभृतयो ये चक्रिणो द्वादश ॥
ये विष्णुप्रतिविष्णुलाङ्गलधरा सप्ताधिकाविंशतिः ।
सर्वे तेऽभयदास्त्रिषष्टिपुरुषाः कुर्वन्तु नो मङ्गलम् ॥

११

पार्श्वो दुःखविदारकस्त्रिभुवने पार्श्वं रटन्ते सुराः ।
पार्श्वेनाऽभिहतं कषायकटकं पार्श्वाय तस्मै नमः ॥
पार्श्वात्प्राप्तसुखं भुजङ्गयुगलं पार्श्वस्य धैर्यं महत् ।
पार्श्वे ध्यानरतो लभेच्छिवपदं हेपार्श्व ! त्वं पाहि नः ॥

१२

यो बाल्ये चलयाञ्चकार चरणांगुष्ठेन देवाचलं ।
यो हत्वा गगनाङ्गणोच्छ्रिततनुं कुब्जीचकारामरम् ॥
भास्वच्चन्द्रमसौ विमानसहितौ यं स्तोतुमभ्यागतौ ।
तं वन्दे त्रिदशाधिराजमहितम् श्रीवर्द्धमानं जिनम् ॥

१३

किं मन्त्रैर्मणिभिः किमौषधगणैः किं किं रसस्फातिभिः ।
किं वा संवननैः किमंजनवरैः किं देवताराधनै-
२ जैतूनामिह पार्श्वनाथ इतिचेन्नित्यं मनोमंदिरे ।
कल्याणी चतुरक्षरा निवसति श्रीसिद्धविद्यादृभुता ॥

१४

नो कीर्त्तिं त्रिदिवाधिपत्यमपि नो नो चक्रवर्त्तिश्रियं ।
सौन्दर्यं न च पाटवं न विभवं नो विष्टपप्राभवं ॥
नो सर्वौषधिमुख्यलब्धिनिवहं नो मुक्तिमभ्यर्थये ।
किन्तु त्वच्चरणारविन्दयुगले भक्तिं जिन श्रेयसीं ॥

१५

ॐ ह्रीं श्रीं धरणोरगेन्द्रमहितः श्रीसप्तभोगोल्लस-
न्माणिक्यावलिकान्तिसंचय इव ध्वान्तप्रपंचारुणः ॥
श्रीवामोदरचारुपंकजवनीमार्त्तण्डबिम्बायितो ।
विघ्नश्रेणिविमंथनो विजयतां श्रीपार्श्वविश्वप्रभुः ॥

१६

पत्रं व्योम मसी महांबुधिसरित्कुल्यादिकानां जलं ।
लेखिन्यः सुरभूरुहाः सुरगणास्ते लेखितारः समे ॥
आयुः सागरकोटयो बहुतराः स्फीता तथापि प्रभो ।
नैकस्यापि गुणस्य ते जिन भवेत्सामस्त्यतो लेखनं ॥

१७

हरीशपूज्योऽप्यहरीशपूज्यः
सुरेशवन्द्योऽप्यसुरेशवन्द्यः ।
अनङ्गरम्योऽपि शुभाङ्गरम्यः
श्रीशान्तिनाथः शुभमातनोतु ॥

१८

संसारदावानलदाहनीरम्
संमोहधूलीहरणे समीरम् ।
माया-रसादारण सारसीरं
नमामि वीरं गिरिराजधीरम् ॥

१९

यः सर्वाणि चराचराणि विविधद्रव्याणि तेषां गुणान् ।
पर्यायानपि भूतभाविभवतः सर्वान् सदा सर्वतः ॥
जानीते युगपत्प्रतिक्षणमतः सर्वज्ञ इत्युच्यते ।
सर्वज्ञाय जिनेश्वराय महते वीराय तस्मै नमः ॥

२०

काष्ठं कल्पतरुः सुमेरुरचलश्चिन्तामणिः प्रस्तरः ।
सूर्यस्तीव्रकरः शशी क्षयकरः क्षारो हि वारांनिधिः ॥
कामो नष्टतनुर्धनोऽनिलवशो नित्यं पशुः कामगौ ।
नैतास्ते तुलयामि भोः जिनपते कस्योपमा दीयते ? ॥

२१

कल्याणानि समुल्लसन्ति जगतां दारिद्र्यविद्रावणा-
द्राघीयः पदवीप्रबर्हघटनाकल्याणकल्पद्रुमात् ॥
कल्याणप्रगुणीभवत्प्रवचनश्रीसिद्धसारस्वत- । ३
श्रीमत्पार्श्वजिनेश्वरस्मरणतः कल्याणमाहात्म्यतः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

२२

यं शैवाः समुपासते शिव इति ब्रह्मेति वेदान्तिनो ।
बौद्धा बुद्ध इति प्रमाणपटवः कर्त्तेति नैयायिकाः ॥
अर्हन्नित्यथ जैनशासनरताः कर्मेति मीमांसकाः ।
सोऽयं नो विदधातु वाञ्छित फलं श्रीवीतरागोजिनः ॥

२३

ओंकारं बिन्दु संयुक्तं, नित्यं ध्यायन्ति योगिनः ।
कामदं मोक्षदं चैव, ओंकाराय नमोनमः ॥

२४

करामलकवत्सर्वं, प्रत्यक्षं येन दृश्यते ।
वन्दे कैवल्यचिद्ज्ञानं, सर्वाज्ञाननिवृत्तये ॥

२५

जिनेन्द्रप्राणिधानेन, गुरूणां वन्दनेन च ।
तिष्ठन्ति न चिरं पापं, छिद्रहस्ते यथोदकम् ॥

२६

तव दासोऽस्मि भृत्योऽस्मि, सेवकोऽस्म्यस्मि किंकरः ।
ओमिति प्रतिपद्यस्व नाथ! नातः परं ब्रुवे ॥

२७

जन्म जन्म कृतं पापं, जन्मकोटिसमार्जितं ।
जन्ममृत्युर्जरायोगः, हन्यते जिनदर्शनात् ॥

२८

भिद्यते हृदयग्रन्थिः, छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि, तस्मिन्दृष्टे परावरे ॥

२९

जितसंमोह सर्वज्ञ, यथावस्थित देशक ।
त्रैलोक्यमहित स्वामिन्, वीतराग नमोस्तुते ॥

३०

अनध्ययनविद्वांसो निर्द्रव्यपरमेश्वराः ।
अनलंकारसुभगाः पान्तु युष्माञ्जिनेश्वराः ॥

३१

त्रैलोक्यं सकलं त्रिकाल विषयं सालोकमालोकितम् ।
साक्षाद्येन यथा स्वयं करतले रेखात्रयं साङ्गुलं ॥
रागद्वेषमया—भयान्तक जरा लोलत्व लोभादयो ।
नालंयत्पदलंघनाय स महादेवो मया वंद्यते ॥

३२

किं बाललीलाकलितो न बालः,
पित्रोः पुरो जल्पतिनिर्विकल्पः ।
तथा यथार्थं कथयामि नाथ!,
निजाशयं सानुशयस्तवाग्रे ॥

३३

दत्तं न दानं परिशीलितं च,
न शालि शीलं न तपोऽभितप्तम् ।
शुभोनभावोऽप्य भवद्भवेस्मिन्,
विभोमयाभ्रान्तमहो मुधैव ॥

३४

दग्धोग्निना क्रोधमयेन दष्टो,
दुष्टेन लोभाख्यमहोरगेण ।
ग्रस्तोऽभिमानाजगरेण माया—
जालेन बद्धोऽस्मि कथं भजे त्वां ॥

३५

वैराग्यरङ्गः परवञ्चनाय,
धर्मोपदेशो जनरञ्जनाय ।
वादाय विद्याऽध्ययनं च मेऽभूत्,
कियद् ब्रुवे हास्यकरं स्वमीश! ॥

३६

परापवादेन मुखं सदोषं नेत्रं परस्त्रीजनवीक्षणेन ।
चेतः परापाय विचिन्तनेन कृतं भविष्यामि कथं विभोऽहं ॥

३७

आयुर्गलत्याशु न पापबुद्धिर्गतं वयो नो विषयाभिलाषः ।
यत्नश्च भैषज्यविधौ न धर्मे, स्वामिन्महामोहविडंबना मे ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

३८

न देवपूजा न च पात्रपूजा न श्राद्धधर्मश्च न साधुधर्मः ।
लब्ध्वापि मानुष्यमिदंसमस्तं कृतंमयाऽरण्यविलापतुल्यं

३९

सद्भोगलीला न च रोगकीला धनागमो नो निधनागमश्च
दारा न कारा नरकस्य चित्ते व्यचिन्ति नित्यं मयकाऽधमेन

४०

अशोकवृक्षः सु पुष्पवृष्टिः,
दिव्यध्वनिश्चामरमासनं च ।
भामंडलं दुंदुभिरातपत्रम्,
सत्प्रातिहार्याणि जिनेश्वराणाम ॥

४१

श्रीपार्श्वनाथो भवपापतापः,
प्रशान्तधाराधरचारुरूपः ।
विघ्नौघहन्ता प्रणतोरगेन्द्रः,
समस्तकल्याणकरो जिनेन्द्रः ॥

४२

श्री द्वादशांगी त्रिविधार्थभङ्गी–
मङ्गीकरोतु स्फुटबुद्धिरङ्गी ।
शिवाध्वयाने प्रवरा तुरङ्गी,
श्रीमज्जिनेन्द्राननपद्मभृङ्गी ॥

४३

खञ्जान्धमूकबधिराः कुणपाः कुरूपाः,
ग्रंथिव्यथाविधुरकुष्टकदर्थ्यमानाः ।
त्वन्नामतोपि मकरध्वजमन्मथारे,
मर्त्याभवन्ति मकरध्वज तुल्य रूपा; ॥

४४

मातंगकेसरिहुताशनदंदशूक,
युद्धाम्बुराशिगदबंधनभूतमुग्रं ।
एति क्षयं भयमशेष विशेषदक्ष,
यस्तावकं स्तवमिमं मतिमानधीते ॥

देव १

महाज्ञानं भवेद्यस्य, लोकालोकप्रकाशकम् ।
महादया दमोध्यानं, महादेवः स उच्यते ॥

२

विमुक्तिमार्गप्रतिपादको यो,
यो जन्ममृत्युव्यसनाद् व्यतीतः ।
त्रिलोक लोकी विकलोऽकलङ्कः,
स देवदेवो हृदये ममास्ताम् ॥

३

भवबीजांकुरजनना, रागाद्याः क्षयमुपागता यस्य ।
ब्रह्मा वा विष्णुर्वा, हरो जिनो वा नमस्तस्मै ॥

४

पक्षपातो न मे वीरे, न द्वेषः कपिलादिषु ।
युक्तिमद् वचनं यस्य, तस्य कार्यः परिग्रहः ॥

५

सर्वज्ञो जितरागादिदोषस्त्रैलोक्यपूजितः ।
यथास्थितार्थवादी च, देवोऽर्हन् परमेश्वरः ॥

६

रागद्वेषौ महामल्लौ, दुर्जयौ येन निर्जितौ ।
महादेवं त्वतो मन्ये, शेषाश्च नामधारकाः ॥

७

नमोस्तुते महादेव, महादोषविवर्जित ।
महालोभविनिर्मुक्त, महागुणसमन्वित ॥

८

महारागो महाद्वेषो, महामोहस्तथापरः ।
कषायाश्चहतो येन, महादेवः स उच्यते ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

९

महाक्रोधो महामानो, महामाया महामदः ।
महालोभोहतो येन, महादेवः स उच्यते ॥

१०

महाकामो हतो येन, महाभयविवर्जितः ।
महाव्रतोपदेशश्च, महादेवः स उच्यते ॥

११

महाधैर्योऽमहावीर्यो, महाशीलो महागुणः ।
महापूजाकृतायस्य, महादेवः स उच्यते ॥

१२

स्वयंभूतं च यज्ज्ञानं, लोकालोकप्रकाशकं ।
अनंतवीर्यं चारित्रं, स्वयंभूः सोऽभिधीयते ॥

१३

परमज्ञानयोगेन परात्मा परमव्ययः ।
परमशान्तिसंयुक्तः, परमात्मा स उच्यते ॥

१४

देवतागणभोग्यास्तु, चामरादिविभूतयः ।
मायाविष्वपि दृश्यन्ते, नातस्त्वमसि नो महान् ॥

१५

प्रशमरसनिमग्नं दृष्टियुग्मं प्रसन्नं,
वदनकमलमङ्कं कामिनीसङ्गशून्यम् ।



करयुगमपि यत् ते शस्त्र सम्बन्धवन्ध्यं,
तदसि जगति देवो वीतरागस्त्वमेव ॥

१६

निरातङ्को निराकांक्षो, निर्विकल्पो निरंजनः ।
परमात्माऽक्षयोऽत्यक्तो, ज्ञेयोऽनन्तगुणोऽव्ययः ॥

१७

सुरासुरेन्द्रसंपूज्यः, सद्भूतार्थप्रदेशकः ।
कृत्स्नकर्मक्षयं कृत्वा, संप्राप्तः परमं पदम् ॥

१८

को देवो ? वीततमाः, कः सुगुरुः शुद्धमार्गसंभाषी ।
किं परमं ? विज्ञानं, स्वकीयगुणदोषविज्ञानम् ॥

१९

देवोऽष्टादशभिर्दोषैर्मुक्तो धर्मो दयाऽन्वितः ।
गुरुश्च ब्रह्मचार्येव, निरारम्भपरिग्रहः ॥

२०

ये स्त्रीशस्त्राक्षसूत्रादिरागाद्यङ्ककलंकिताः ।
निग्रहानुग्रहपरास्ते देवाः स्युर्न मुक्तये ॥

२१

यक्षाणां च पिशाचानां, मद्यमांसभुजां तथा ।
दिवौकसां तु भजनं, सुरापानसमं स्मृतम् ॥

२२

प्रमदा भाषते कामं, द्वेषमायुधसंग्रहः ।
जपमालाद्यसर्वज्ञं, शौचाभावं कमण्डलुः ॥

२३

निर्मलस्य कुतः स्नानं, वस्त्रं विश्वोदरस्य च ।
निरालम्बस्योपवीतं, पुष्पं निर्वासनस्य च ॥

२४

निर्लेपस्य कुतो गन्धो, रम्यस्याभरणं कुतः ।
निर्गंधस्य कुतो धूपः, स्वप्रकाशस्य दीपनम् ॥

२५

नित्यतृप्तस्य नैवेद्यं, ताम्बूलं च कुतो विभोः ।
स्वयं प्रकाशमानस्य, कुतो नीराजनं विभोः ॥

२६

अन्तर्बहिश्च पूर्णस्य, कथमुद्वासनं भवेत् ।
एवमेव परा पूजा, सर्वावस्थासु सर्वदा ॥

२७

अन्तराया दानलाभवीर्यभोगोपभोगगाः ।
हासो रत्यरतीभीतिर्जुगुप्सा शोक एव च ॥

२८

कामो मिथ्यात्वमज्ञानं निद्रा चाविरतिस्तथा ।
रागो द्वेषश्च नो दोषास्तेषामष्टादशाप्यमी ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

२९

यः स्मर्यते सर्वमुनीन्द्रवृन्दैः यः स्तूयते सर्वनरामरेन्द्रैः।
योगीयते वेदपुराणशास्त्रैः स देवदेवो हृदये ममास्ताम् ॥

३०

यो दर्शनज्ञानसुखस्वभावः समस्तसंसारविकार बाह्यः।
समाधिगम्यः परमात्मसंज्ञः स देवदेवो हृदये ममास्ताम् ॥

३१

यो व्यापको विश्वजनीनवृत्तिः सिद्धो विबुद्धो धुतकर्मबंधः।
ध्यातो धुनीते सकलं विकारं स देवदेवो हृदये ममास्ताम् ॥

३२

न स्पृश्यते कर्मकलङ्कदोषैः यो ध्वान्तसंघैरिव तिग्मरश्मिः।
निरञ्जनं नित्यमनेकमेकं तं देवमाप्तं शरणं प्रपद्ये ॥

## गुरु १

अज्ञानतिमिरान्धानां, ज्ञानाञ्जनशलाकया।
चक्षुरुन्मीलितं येन, तस्मै श्रीगुरवे नमः ॥

२

एकमप्यक्षरं यस्तु गुरुः शिष्ये निवेदयेत्।
पृथिव्यां नास्ति तद्द्रव्यं, यद्दत्वा ह्यनृणी भवेत् ॥

३

एकाक्षरप्रदातारं, यो गुरुं नाभिमन्यते।
शुनां योनिशतं गत्वा, चाण्डालेष्वभिजायते ॥

४

महाव्रतधरा धीरा, भैक्षमात्रोपजीविनः।
सामायिकस्था धर्मोपदेशका गुरवोमताः ॥

५

बालः पश्यति लिङ्गं, मध्यम बुद्धिर्विचारयति वृत्तम्।
आगमतत्त्वं तु बुधः, परीक्षते सर्वयत्नेन ॥

६

योगीन्द्रः श्रुतपारगः समरसाम्भोधौ निमग्नः सदा।
शान्तिक्षान्तिनितान्तदान्तिनिपुणो धर्मैकनिष्ठारतः ॥

७

शिष्याणां शुभचित्तशुद्धिजनकः संसर्गमात्रेण यः।
सोऽन्यांस्तारयति स्वयं च तरति स्वार्थं विनासद्गुरुः ॥

८

यः समः सर्वभूतेषु, विरागी गतमत्सरः।
जितेन्द्रियः शुचिर्दक्षः, सदाचारसमन्वितः ॥

९

सत्यं गृणाति शिष्येभ्यः, इत्येवं योनिरुच्यते।
हितोपदेशकश्चैव, गुरुशब्दार्थ एव सः ॥

१०

विद्याऽभ्यासस्तपयो ज्ञानमिन्द्रियाणां च संयमः।
अहिंसा गुरुसेवा च, निःश्रेयस्करं परम् ॥

११

नीचं शय्यासनं चास्य, सर्वदा गुरुसन्निधौ।
गुरोस्तु चक्षुर्विषये, न यथेष्टासनो भवेत् ॥

१२

त्यजेद्धर्मं दयाहीनं, विद्याहीनं गुरुं त्यजेत्।
त्यजेत् क्रोधमुखीं भार्यां, निःस्नेहान्बान्धवांस्तजेत् ॥

१३

गुरवो विरलाः सन्ति, शिष्यसन्तापहारकाः।
गुरवो बहवः सन्ति, शिष्य वित्तापहारकाः ॥

१४

पूर्णे तटाके तृषितः सदैव, भूतेऽपि गेहे क्षुधितः स मूढः।
कल्पद्रुमे सत्यपि वै दरिद्रो, गुर्वादियोगेऽपि हि यःप्रमादी॥

१५

पिता माता भ्राता प्रियसहचरी सूनुनिवहः।
सुहृत् स्वामी माद्यत्करिभटरथाश्वाः परिकरः ॥
निमज्जन्तं जन्तुं नरककुहरे रक्षितुमलं।
गुरोर्धर्माधर्मप्रकटनपरात्कोऽपि न परः ॥

१६

वेषं न विश्वसेत्प्राज्ञो, वेषो दोषाय जायते।
रावणो भिक्षुरूपेण, जहार जनकात्मजाम् ॥


७

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

१७

यथा चतुर्भिः कनकं परीक्ष्यते,
निघर्षणच्छेदनतापताडनैः ।
तथा चतुर्भिः पुरुषः परीक्ष्यते,
त्यागेन शीलेन गुणेन कर्मणा ॥

१८

विना गुरुभ्यो गुणनीरधिभ्यो,
जानाति तत्त्वं न विचक्षणोऽपि ।
आकर्णदीर्घायितलोचनोऽपि,
दीपं विना पश्यति नांधकारे ॥

१९

असित गिरिसमं स्यात् कज्जलं सिन्धुपात्रे—
सुरतरुवरशाखा लेखिनी पत्रमुर्वी ।
लिखति यदि गृहीत्वा शारदा सर्वकाले,
तदपि तव गुणानामीशपारं न याति ॥

२०

गु शब्दस्त्वन्धकारस्य, रु शब्दस्तन्निरोधकः ।
अन्धकार निरोधत्वाद्गुरु रित्यभिधीयते ॥

२१

दुग्धेन धेनुः कुसुमेनवल्ली,
शीलेन भार्या कमलेनतोयम् ।
गुरुः विना भाति न चैव शिष्यः,
शमेन विद्या नगरी जनेन ॥

२२

गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ।
गुरुः साक्षात् परं ब्रह्म, तस्मै श्रीगुरवे नमः ॥

२३

धर्मज्ञो धर्मकर्ता च, सदा धर्मपरायणः ।
तत्त्वेभ्यः सर्वशास्त्रार्थदेशको गुरुरुच्यते ॥

२४

निवर्तयत्यन्यजनं प्रमादतः,
स्वयं च निष्पापपथे प्रवर्तते ।
गृणाति तत्त्वं हितमिच्छुरङ्गिनां,
शिवार्थिनां यः स गुरुर्निगद्यते ॥

२५

शुभोपदेशदातारो, वयोवृद्धा बहुश्रुताः ।
कुशला धर्मशास्त्रेषु, पर्युपास्या मुहुर्मुहुः ॥

२६

न स्नानेन न मौनेन, नैवाग्निपरिचर्यया ।
ब्रह्मचारी दिवं याति, स याति गुरुपूजनात् ॥

२७

सर्वाभिलाषिणः सर्वभोजिनः सपरिग्रहाः ।
अब्रह्मचारिणो मिथ्योपदेशा गुरवो न तु ॥

२८

परिग्रहारम्भमग्नास्तारयेयुः कथं परान् ? ।
स्वयं दरिद्रो न परमीश्वरीकर्तुमीश्वरः ॥

२९

वैद्यो गुरुश्च मन्त्री च, यस्य कस्य प्रियः सदा ।
शरीरधर्मकोशेभ्यः, क्षिप्रं स परिहीयते ॥

३०

गुरुप्रज्ञाप्रसादेन, मूर्खो वा यदि पण्डितः ।
यस्तु संबुध्यते तत्त्वं, विरक्तो भवसागरात् ॥

३१

गुरुशब्दो हि लोके स्यादधिकार्थस्य वाचकः ।
सर्वस्मादधिको ह्यात्मा, तदीयश्च ततो गुरुः ॥

३२

प्राकृतैः संस्कृतैश्चापि, गद्यपद्याक्षरैस्तथा ।
देशभाषादिभिश्चैव, बोधयेत्स गुरुः स्मृतः ॥

३३

किमत्र बहुनोक्तेन, शास्त्रकोटिशतेन च ।
दुर्लभा चित्तविश्रांतिर्विना गुरुकृपापरम् ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

१४

श्रुतिस्मृतिमविज्ञाय, केवलं गुरुसेवकाः ।
ते वै संन्यासिनः प्रोक्ता इतरे वेषधारिणः ॥

## धर्म ।

एक एव सुहृद्धर्मो, निधनेऽप्यनुयाति यः ।
शरीरेण समं नाशं, सर्वमन्यद्धि गच्छति ॥ १ ॥
नामुत्र हि सहायार्थं, पिता माता च तिष्ठतः ।
पुत्रो दारा न ज्ञातिर्वा धर्मस्तिष्ठति केवलः ॥ २ ॥
मृतं शरीरमुत्सृज्य, काष्ठलोष्ठसमं क्षितौ ।
विमुखा बान्धवा यान्ति, धर्मस्तमनुगच्छति ॥ ३ ॥
तस्माद्धर्मं सहायार्थं, नित्यं संचिनुयाच्छनैः ।
धर्मेण हि सहायेन, तमस्तरति दुस्तरम् ॥ ४ ॥
सकलाऽपि कला कलावतां,विकला धर्मकलां विना खलु।
सकले नयने वृथा यथा, तनुभाजां हि कनीनिकां विना ५
आयुः क्षणलवमात्रं, न लभ्यते हेमकोटिभिः क्कापि ।
तच्चेतद्गच्छति सर्वं, मृषा ततः काऽधिका हानिः ॥६॥
अनित्यानि शरीराणि, विभवो नैव शाश्वतः ।
नित्यः संनिहितो मृत्युः, कर्तव्यो धर्मसंग्रहः ॥ ७ ॥

यावत्स्वस्थमिदं देहं, यावन्मृत्युश्च दूरतः ।
तावदात्महितं कुर्यात्प्राणान्ते किं करिष्यति ॥ ८ ॥
युवैव धर्मशीलः स्यादनित्यं खलु जीवितम् ।
को हि जानाति कस्याद्य, मृत्युकालो भविष्यति ॥ ९ ॥
जीवन्तं मृतवन्मन्ये, देहिनं धर्मवर्जितम् ।
मृतो धर्मेण संयुक्तो, दीर्घजीवी न संशयः ॥१०॥
अजरामरवत्प्राज्ञो, विद्यामर्थञ्च चिन्तयेत् ।
गृहीत इव केशेषु, मृत्युना धर्ममाचरेत् ॥११॥
उत्थायोत्थाय बोद्धव्यं, किमद्य सुकृतं कृतम् ।
आयुषः खण्डमादाय, रविरस्तं गमिष्यति ॥१२॥
अस्थिरं जीवितं लोके, ह्यस्थिरे धनयौवने ।
अस्थिराः पुत्र दाराश्च, धर्मः कीर्तिर्द्वयं स्थिरम् ॥१३॥
मुहूर्तमपि जीवेच्च, नरः शुक्लेन कर्मणा ।
न कल्पमपि पापेन, लोकद्वयविरोधिना ॥१४॥
यौवनं जीवितं चित्तं, छाया लक्ष्मीश्च स्वामिता ।
चञ्चलानि षडेतानि, ज्ञात्वा धर्मरतो भवेत् ॥१५॥
दिवसेनैव तत्कुर्याद्येन रात्रौ सुखं वसेत् ।
अष्टमासेन तत्कुर्याद्येन वर्षा सुखं वसेत् ॥१६॥
पूर्वे वयसि तत्कुर्याद्येन वृद्धः सुखं वसेत् ।
यावज्जीवेन तत्कुर्याद्येनामुत्र सुखं वसेत् ॥१७॥

विद्या रूपं धनं शौर्यं, कुलीनत्वमरोगता ।
राज्यं स्वर्गश्च मोक्षश्च, सर्वं धर्मादवाप्यते ॥१८॥
सर्वेषां यः सुहृन्नित्यं, सर्वेषां च हिते रतः ।
कर्मणा मनसा वाचा, स धर्मं वेद नेतरः ॥१९॥
अद्रोहः सर्वभूतेषु, कर्मणा मनसा गिरा ।
अनुग्रहश्च दानञ्च, सतां धर्मः सनातनः ॥२०॥
चक्षुर्दद्यान्मनो दद्याद्वाचं दद्यात्सुभाषितम् ।
उत्थाय चासनं दद्यादेष धर्मः सनातनः ॥२१॥
अहिंसा सत्यमक्रोधो, दानमेतच्चतुष्टयम् ।
अजातशत्रो ! सेवस्व, धर्म एषः सनातनः ॥२२॥
सत्यं ब्रूयात्प्रियं ब्रूयात्, न ब्रूयात् सत्यमप्रियं ।
प्रियञ्च नानृतं ब्रूयात्, एष धर्मः सनातनः ॥२३॥
ब्रह्मचर्यं तथा सत्य-मनुक्रोशो धृतिः क्षमा ।
सनातनस्य धर्मस्य, मूलमेतत्सनातनम् ॥२४॥
अकृत्यं नैव कर्तव्यं, प्राणत्यागेऽप्युपस्थिते ।
न च कृत्यं परित्याज्य-मेष धर्मः सनातनः ॥२५॥
अध्रुवेण शरीरेण, प्रतिक्षणविनाशिना ।
ध्रुवं यो नार्जयेद्धर्मं, स शोच्यो मूढचेतनः ॥२६॥
धर्म एव हतो हन्ति, धर्मो रक्षति रक्षितः ।
तस्माद्धर्मो न हातव्यो, मा नो धर्मो हतोऽवधीत् ॥२७॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धर्मस्य तस्य लिङ्गानि, दया क्षान्तिरहिंसनम् ।
तपो दानञ्च शीलञ्च, सत्यं शौचं वितृष्णता ॥२८॥
शक्तिमानप्यशक्तोऽसौ, धनवानपि निर्धनः ।
श्रुतवानपि मूर्खश्च, यो धर्मविमुखो नरः ॥२९॥
न हर्तव्यं परधनं, धर्म्म एष सनातनः ।
मन्यन्ते बलवन्तस्तं, दुर्बलैः संप्रकीर्तितम् ॥३०॥
धर्मो माता पिता चैव, धर्मो बन्धुः सुहृत्तथा ।
धर्मः स्वर्गस्य सोपानं, धर्मात्स्वर्गमवाप्यते ॥३१॥
सत्यमार्जवमक्रोध-मनसूयां दमं तपः ।
अहिंसा चानृशस्यं च, क्षमां चैवानुपालय ॥३२॥
सोपानभूतं स्वर्गस्य, मानुष्यं प्राप्य दुर्लभम् ।
तथात्मानं समाधत्स्व भ्रश्यसे न पुनर्यथा ॥३३॥
धृतिः क्षमा दमोऽस्तेयं, शौचमिन्द्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधो, दशकं धर्मलक्षणम् ॥३४॥
इज्याऽध्ययनदानानि, तपः सत्यं क्षमा दमः ।
अलोभ इति मार्गोयं, धर्मस्याष्टविधः स्मृतः ॥३५॥
संक्षेपात्कथ्यते धर्मो, जनाः किं विस्तरेण नः ।
परोपकारः पुण्याय, पापाय परपीडनम् ॥३६॥
श्रूयतां धर्मसर्वस्वं, श्रुत्वा चैवावधार्यताम् ।
आत्मनः प्रतिकूलानि, परेषां न समाचरेत् ॥३७॥

यथा यथा हि पुरुषः, कल्याणे कुरुते मनः ।
तथा तथाऽस्य सर्वार्थाः, सिध्यन्ते नात्र संशयः ॥३८॥
बालो वा यदि वा वृद्धो, युवा वा गृहमागतः ।
तस्य पूजा विधातव्या, सर्वस्याभ्यागतो गुरुः ॥३९॥
राज्यं सुसम्पदा भोगाः, कुले जन्म सुरूपता ।
पाण्डित्यमायुरारोग्यं, धर्मस्यैतत्फलं विदुः ॥४०॥
न पुत्रात्परमो लाभो, न भार्यायाः परं सुखम् ।
न धर्मात् परमं मित्रं, नानृतात्पातकं परम् ॥४१॥
क्षमा तुल्यं तपो नास्ति, न संतोषात्परं सुखम् ।
न तृष्णायाः परो व्याधिर्न च धर्मो दयाऽपरः ॥४२॥
न क्लेशेन विना द्रव्यं, विना द्रव्येण न क्रिया ।
क्रियाहीने न धर्मः स्यात्, धर्महीने कुतः सुखम् ॥४३॥
अन्य स्थाने कृतं पापं, धर्मस्थाने विमुच्यते ।
धर्मस्थाने कृतं पापं, वज्रलेपो भविष्यति ॥४४॥
प्रदोषे दीपकश्चन्द्रः प्रभाते दीपको रविः ।
त्रिलोकदीपको धर्मः, सुपुत्रः कुलदीपकः ॥४५॥
दुर्गतिप्रपतज्जन्तून्, धारणाद् धर्म उच्यते ।
धत्ते चैतान् शुभस्थाने, तस्माद्धर्म इति स्मृतः ॥४६॥
पञ्चैतानि पवित्राणि, सर्वेषां धर्मचारिणाम् ।
अहिंसासत्यमस्तेयं, त्यागो मैथुनवर्जनम् ॥४७॥

धर्मो मातेव पुष्णाति, धर्मः पाति पितेव च ।
धर्मः सखेव प्रीणाति, धर्मः स्निह्यति बन्धुवत् ॥४८॥
कथमुत्पद्यते धर्मः ?, कथं धर्मो विवर्धते ? ।
कथं च स्थाप्यते धर्मः ?, कथं धर्मो विनश्यति ॥४९॥
सत्येनोत्पद्यते धर्मो, दयादानेन वर्धते ।
क्षमायां स्थाप्यते धर्मो, क्रोधलोभाद्विनश्यति ॥५०॥
धर्मस्य फलमिच्छन्ति, धर्मं नेच्छन्ति मानवाः ।
फलं पापस्य नेच्छन्ति, पापं कुर्वन्ति सादराः ॥५१॥
छिन्नमूलो यथा वृक्षो, गतशीर्षो यथा भटः ।
धर्महीनो धनी तद्वत्, कियत्कालं ललिष्यति ॥५२॥
याति कालो गलत्यायुर्विभूतिरतिचञ्चला ।
प्रियेषु क्षणिकं प्रेम, केयं धर्मेऽवधीरणा ॥५३॥
कथं चरेत् कथं तिष्ठेद्, आसीत च शयीत च ।
कथं भुञ्जीत जल्पेच्च, पापकर्म न बध्यते ॥५४॥
दयाचर्या दयास्थानं, दयाऽऽसनं दयाशयः ।
दयाभुक्तिर्दयाजल्पः, पापकर्म न बध्यते ॥५५॥
धर्मं प्रसङ्गादपि नाचरन्ति,
पापं प्रयत्नेन समाचरन्ति ।
आश्चर्यमेतद्धि मनुष्यलोकेऽ-
मृतं परित्यज्य विषं पिबन्ति ॥५६॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आहारनिद्राभयमैथुनञ्च,
सामान्यमेतत् पशुभिर्नराणाम् ।
धर्मो हि तेषामधिको विशेषो,
धर्मेण हीनाः पशुभिः समानाः ॥५७॥

दानं सुपात्रे सुभगं च शीलं,
तपो विचित्रं शुभभावना च।
भवार्णवोत्तारणयानपात्रं,
धर्मश्चतुर्धा मुनयो वदन्ति ॥५८॥

दीपो यथाल्पोपि तमांसि हंति,
लवोऽपि रोगान् हरते सुधायाः।
तृणां दहत्याशु कणोऽपि चाग्ने-
र्धर्मस्य लेशोऽप्यमलस्तथांहः ॥५९॥

ग्रामो नास्ति कुतः सीमा, भार्या नास्ति कुतः सुतः ।
प्रज्ञा नास्ति कुतो विद्या, धर्मो नास्ति कुतः सुखम् ॥६०॥

यः प्राप्य मानुषं जन्म, दुर्लभं भवकोटिभिः।
धर्मं शर्मकरं कुर्यात्, सफलं तस्य जीवितम् ॥६१॥

को जीवति गुणा यस्य, यस्य धर्मः स जीवति।
गुणधर्मविहीनस्य, निष्फलं तस्य जीवितम्॥६२॥

संपत्तौ नियमः शक्तौ सहनं यौवने व्रतम्।
दारिद्र्ये दानमप्यल्पं, महालाभाय जायते॥६३॥

अनन्तदुःखः संसारो, मोक्षोऽनन्तसुखः पुनः।
तयोस्त्यागपरिप्राप्ती, हेतुं धर्मं विना नहि ॥६४॥

राजन्नसारे संसारे, सारमन्यन्न किंचन।
सारोऽस्ति धर्म एवैकः, सरोजमिव कर्दमे ॥६५॥

नागो भाति मदेन कं जलरुहैः पूर्णेन्दुना शर्वरी ।
वाणी व्याकरणेन हंसमिथुनैर्नद्यः सभा पण्डितैः ॥
शीलेन प्रमदा जवेन तुरगो नित्योत्सवैर्मन्दिरं ।
सत्पुत्रेण कुलं नृपेण वसुधा लोकत्रयं धार्मिकैः ॥६६॥

धर्मः कल्पतरुर्मणिर्विषहरो रत्नं च चिन्तामणि-
र्धर्मः कामदुधा सदा सुखकरी सञ्जीवनी चौषधिः।
धर्मः कामघटश्च कल्पलतिका विद्याकलानां खनिः।
प्रेम्णैनं परमेण पालय हृदा नो चेद् वृथाजीवनम् ॥६७॥

मम गृहवनमाला वाजिशाला ममेयं,
गजवृषभगणा मे भृत्यसार्था ममेमे ॥
वदति सति ममेति मृत्युमापद्यते चे-
न्नहि तव किमपि स्याद्धर्ममेकं विनाऽन्यत् ॥६८॥

नरकान्धमहाकूपे, पततां प्राणिनां स्वयम्।
धर्म एव स्वसामर्थ्याद्दत्ते हस्तावलम्बनम् ॥६९॥

यस्य न रागद्वेषौ, नापि स्वार्थो ममत्वलेशो वा।
तेनोक्तो यो धर्मः, सत्यं पथ्यं हितं मन्ये ॥७०॥

किं वा मित्रं प्रवासे च, किंवा मित्रं गृहेषु च।
व्याधिमतश्च किं मित्रं, किं वा मित्रं मृतस्य च ॥७१॥

विद्या मित्रं प्रवासे च, भार्या मित्रं गृहेषु च।
रोगिणश्चौषधं मित्रं, धर्मो मित्रं मृतस्य च ॥७२॥

अर्थाः पादरजोपमा गिरिनदीवेगोपमं यौवनं,
आयुष्यं जललोलबिंदुचपलं फेनोपमं जीवितम् ।
धर्मं यो न करोति निन्दितमतिः स्वर्गार्गलोद्घाटनं,
पश्चात्तापयुतो जरापरिगतः शोकाग्निना दह्यते ॥७३॥

यावत्स्वस्थमिदं शरीरमरुजं यावज्जरा दूरतो,
यावच्चेन्द्रियशक्तिरप्रतिहता यावत्क्षयो नायुषः।
आत्मश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महान्
संदीप्ते भवने तु कूपखननं प्रत्युद्यमः कीदृशः ? ॥७४॥

धर्माज्जन्म कुले शरीरपटुता,
सौभाग्यमायुर्बलम्,
धर्मेणैव भवन्ति निर्मलयशो-
विद्यार्थसंपत्तयः
कान्ताराच्च महाभयाच्च सततं,
धर्मः परित्रायते,
धर्मः सम्यगुपासतां भवति,
हि स्वर्गापवर्गप्रदः ॥७५॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धर्मः सर्वसुखाकरो हितकरो,
धर्मं बुधाश्चिन्वते,
धर्मेणैव समाप्यते शिवसुखं,
धर्माय तस्मै नमः ।
धर्मान्नास्त्यपरः सुहृद् भवभृतां,
धर्मस्य तत्त्वं महत्,
धर्मे चित्तमहं दधे प्रतिदिनं,
हे धर्म ! मां पालय ॥७६॥
धर्मोयं धनवल्लभेषु धनदः,
कामार्थिनां कामदः,
सौभाग्यार्थिषु तत्प्रदः किमपरम्ः,
पुत्रार्थिनां पुत्रदः ।
राज्यार्थिष्वपि राज्यदः किमथवा,
नानाविकल्पैर्नृणाम्,
तत् किम् यन्न ददाति वाञ्छितफलं,
स्वर्गापवर्गावधि ॥७७॥
धर्मः शर्म भुजङ्गपुङ्गवपुरी-
सारं विधातुं क्षमो,
धर्मः प्रापितमर्त्यलोकविपुल-
प्रीतिस्तदाशंसिनाम् ।
धर्मः स्वर्नगरीनिरन्तरसुखा-
स्वादोदयस्यास्पदम्,
धर्मः किन्न करोति मुक्तिललना-
सम्भोगयोग्यं जनम् ॥७८॥
यदि नरकनिपातस्त्यक्तुमत्यन्तमिष्ट-
स्त्रिदशपतिमहर्द्धिः प्राप्तुमेकान्ततो वा ।
यदि चरमपुमर्थः प्रार्थनीयस्तदानीं,
किमपरमभिधेयं नाम धर्मं विधत्त ॥७९॥
ते धत्तूरतरुं वपन्ति भवने प्रोन्मूल्य कल्पद्रुमं,
चिन्तारत्नमपास्य काचशकलं स्वीकुर्वते ते जडाः ।
विक्रीय द्विरदं गिरीन्द्रसदृशं क्रीणंति ते रासभं,
ये लब्धं परिहृत्य धर्म्ममधमा धावन्ति भोगाशया॥८०॥
अपारे संसारे कथमपि समासाद्य नृभवं,
न धर्मं यः कुर्याद्विषयसुखतृष्णातरलितः ।
ब्रुडन् पारावारे प्रवरमपहाय प्रवहणं,
स मुख्यो मूर्खाणामुपलमुपलब्धुं प्रयतते ॥८१॥
प्रथमे नार्जिता विद्या, द्वितीये नार्जितं धनम् ।
तृतीये नार्जितं पुण्यं, चतुर्थे किं करिष्यति ॥८२॥
मनसश्चेन्द्रियाणाञ्च, निग्रहः परमं तपः ।
स ज्यायः सर्वधर्मेभ्यः, स धर्मः पर उच्यते ॥८३॥
प्रत्यक्षं चानुमानं च, शास्त्रं च विविधागमम् ।
त्रयं सुविदितं कार्यं, धर्मशुद्धिमभीप्सता ॥८४॥
क्षणं चित्तं क्षणं वित्तं, क्षणं जीवति मानवः ।
यमस्य करुणा नास्ति, धर्मस्य त्वरिता गतिः ॥८५॥
धर्मेण हन्यते व्याधिर्हन्यन्ते वै तथा ग्रहाः ।
धर्मेण हन्यते शत्रुर्यतो धर्मस्ततो जयः ॥८६॥
अन्नेन गात्रं नयनेन वक्त्रं,
नयेन राज्यं लवणेन भोज्यम् ।
धर्मेण हीनं बत जीवितव्यं,
न राजते चन्द्रमसा निशीथं ॥८७॥
शस्येन देशः पयसाब्जखण्डं,
शौर्येण शस्त्री विटपी फलेन ।
धर्मेण शोभामुपयाति मर्त्यो,
मदेन दन्ती तुरगो जवेन ॥८८॥
शस्यानि बीजं सलिलानि मेघं,
घृतानि दुग्धं कुसुमानि वृक्षं ।
कांक्षत्यहान्येष विना दिनेशं,
धर्मं विना कांक्षति यः सुखानि ॥८९॥
हरति जननदुःखं मुक्तिसौख्यं विधत्ते,
रचयति शुभबुद्धिं पापबुद्धिं धुनीते ।



For Private And Personal Use Only

अवति सकलजन्तून् कर्मशत्रून्निहन्ति,
प्रशमयति मनोर्यस्तं बुधा धर्ममाहुः ॥९०॥
व्याधिजन्मजरामृत्युग्रस्तानां प्राणिनामिह ।
विना जिनोदितं धर्मं, शरणं कोऽपि नापरः ॥९१॥
स धर्मो यो दयायुक्तः, सर्वप्राणिहितप्रदः ।
स एवोत्तारणे शक्तो, भवाम्भोधेः सुदुस्तरात् ॥९२॥
पञ्चैतानि पवित्राणि, सर्वेषां धर्मचारिणाम् ।
अहिंसा सत्यमस्तेयं, त्यागो मैथुनवर्जनम् ॥९३॥
अहिंसासूनृतास्तेय—ब्रह्माकिञ्चनतामयः ।
केवल्युपज्ञः परमो, धर्मश्च शरणं मम ॥९४॥
धर्मो मङ्गलमुत्कृष्टं, धर्मः स्वर्गापवर्गदः ।
धर्मः संसारकान्तारोल्लङ्घने मार्गदेशकः ॥९५॥
चला लक्ष्मीश्चलाः प्राणाश्चले जीवितमन्दिरे ।
चलाचले च संसारे, धर्म एको हि निश्चलः ॥९६॥
अपारे व्यसनाम्भोधौ, पतन्तं पाति देहिनम् ।
सदा सविधवर्त्येको बन्धुर्धर्मोऽतिवत्सलः ॥९७॥
अबन्धूनामसौ बन्धुरसखीनामसौ सखा ।
अनाथानामसौ नाथो, धर्मो विश्वैकवत्सलः ॥९८॥
सुखार्थं सर्वभूतानां, मताः सर्वाः प्रवृत्तयः ।
सुखं नास्ति विना धर्मं, तस्माद्धर्मपरो भवेत् ॥९९॥

१००

धर्मामृतं सदा पेयं. दुःखातङ्कविनाशनम् ।
यस्मिन् पीते परं सौख्यं, जीवानां जायते सदा॥

१०१

संयमः सूनृतं शौचं, ब्रह्माकिञ्चनता तपः ।
क्षान्तिर्मार्दवमृजुता, मुक्तिश्च दशधा स तु ॥

१०२

अथाऽहिंसा क्षमा सत्यं, ह्रीश्रद्धेन्द्रियसंयमाः ।
दानमिज्या तपोध्यानं, दशकं धर्मसाधनम् ॥

१०३

दुर्गतिप्रपतज्जन्तुधारणाद्धर्म उच्यते ।
दानशीलतपोभावभेदात् स तु चतुर्विधः ॥

१०४

भव्यजीवे दयादानं, धर्मकल्पतरूपमम् ।
दानशीलतपोभावं शाखा मुक्तिसुखं फलम् ॥

१०५

छिन्नमूलो यथा वृक्षो, गतशीर्षो यथा भटः ।
धर्महीनो धनी तद्वत्, कियत्कालं ललिष्यति ? ॥

१०६

धर्मस्य दुर्लभो ज्ञाता, सम्यग्वक्ता ततोऽपि च ।
श्रोता ततोऽपि श्रद्धावान्, कर्त्ता कोऽपि ततः सुधीः ॥

१०७

विलम्बो नैव कर्तव्य, आयुर्याति दिने दिने ।
न करोति यमः क्षान्ति, धर्मस्य त्वरिता गतिः ॥

१०८

दुःखं पापात् सुखं धर्मात्, सर्वशास्त्रेषु संस्थितिः ।
न कर्तव्यमतः पापं, कर्तव्यो धर्मसंचयः ॥

१०९

अनन्तदुःखः संसारो मोक्षोऽनन्तसुखः पुनः ।
तयोस्त्यागपरिप्राप्तिर्हेतुधर्मं विना न हि ॥

११०

न क्लेशेन विना द्रव्यं, द्रव्यहीने कुतः क्रिया ।
क्रियाहीने न धर्मः स्याद्धर्महीने कुतः सुखम् ॥

१११

धर्मकार्ये मतिस्तावद्यावदायुर्दृढं तव ।
आयुः कर्माणि संक्षीणे, पश्चात्त्वं किं करिष्यसि ? ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

११२

बाल्यादपि चरेद्धर्ममनित्यं खलु जीवितम् ।
फलानामिव पक्कानां, शश्वत्पतनतो भयम् ॥

११३

विद्या तपो धनं शौर्यं, कुलीनत्वमरोगता ।
राज्यं स्वर्गश्च मोक्षश्च, सर्वं धर्मादवाप्यते ॥

११४

सन्ततिः शुद्धसौजन्या, विभूतिर्भोगभासुरा ।
विद्या विनयविख्याता, फलं धर्मतरोरिदम् ॥

११५

दीर्घमायुर्यशश्चारु, शुद्धां बुद्धिं शुभां श्रियम् ।
साज्यं राज्यं सुखं शश्वद्, दत्ते धर्मसुरद्रुमः ॥

११६

स्वर्गापवर्गसंपत्तिकारणं करुणामयः ।
जैन एव सतां धर्मः, कर्मघर्मघनाघनः ॥

११७

अभेद्यो वादिभिर्जैनः, कुंजैररिव मन्दरः ।
जीवरक्षामयः साक्षादेष धर्मः सनातनः ॥

११८

जिनधर्मविनिर्मुक्तो, मा भूवं चक्रवर्त्यपि ।
स्यां चेटोऽपि दरिद्रोऽपि, जिनधर्माधिवासितः ॥

११९

जिनशासनस्य सारो, जीवदया निग्रहः कषायाणाम् ।
साधर्मिकवात्सल्यं, भक्तिश्च तथा जिनेन्द्राणाम् ॥

१२०

म्लायन्ति पुष्पनिचयाः प्रहरार्धकेन,
वैगन्ध्यमेति दिवसेन कृतोऽङ्गरागः ।
जीर्यन्ति रम्यवसनान्यपि भूरिवर्षैः,
नो जीर्यते युगशतैर्जिनधर्मसेवा ॥

१२१

रम्यं रूपं करणपटुताऽऽरोग्यमायुर्विशालं ।
कान्ता रूपानमितरतयः सूनवो भक्तिमन्तः ॥
षट्खण्डोर्वीतलपरिवृढत्वं यशः क्षीरशुभ्रं ।
सौभाग्यश्रीरितिफलमहो धर्मवृक्षस्य सर्वम् ॥

१२२

धर्माज्जन्म कुले कलङ्कविकले जातिः सुधर्मात्परा ।
धर्मादायुरखण्डितं गुरुबलं धर्माच्च नीरोगता ॥
धर्माद्वित्तमनिन्दितं निरुपमा भोगाः सुकीर्तिः सुधीः ।
धर्मादेव च देहिनां प्रभवतः स्वर्गापवर्गावपि ॥

१२३

अर्हद्धर्मतरोः फलानि सुकुले जन्मानघं जीवितं ।
सल्लक्ष्मीर्बुद्धिबले प्रतापयशसी सौभाग्यमारोग्यता ॥
क्ष्माभृत्केशवचक्रिशक्रशशभृत्प्रद्योतनानां पदं ।
सार्वश्रीगणभृत्पदं शिवरमा सम्बन्धयो देहिनाम् ॥

१२४

अविज्ञाय नरो धर्मं, दुःखमायाति याति च ।
मनुष्यजन्मसाफल्यं, केवलं धर्मसेवनम् ॥

१२५

कुलं रूपं कलाभ्यासं विद्या लक्ष्मीर्वरांगना ।
ऐश्वर्यं च प्रभुत्वं च धर्मेणैव प्रजायते ॥

## मुनि गुणाः ।

१

ये तीर्णा भववारिधिं मुनिवरास्तेभ्यो नमस्कुर्महे ।
येषां नो विषयेषु गृध्यति मनो नो वा कषायैः प्लुतम् ॥
रागद्वेषविमुक् प्रशान्तकलुषं साम्याप्तशर्मद्वयं ।
नित्यं खेलति चात्मसंयमगुणाः क्रीडे भजद्भावनाः ॥




For Private And Personal Use Only

२

यस्मिन्देशे भवेद्योगी, ध्यानयोगविचक्षणः ।
सोऽपि देशो भवेत्पूतः, किं पुनर्यस्य बान्धवः ॥

३

श्रुत्वा स्पृष्ट्वा च दृष्ट्वा च, भुक्त्वा घ्रात्वा च यो नरः ।
न हृष्यति ग्लायति वा, स विज्ञेयो जितेन्द्रियः ॥

४

स्थानोपवेशनस्वाप–निक्षेपग्रहणादिषु ।
जन्तुप्रमार्जनार्थं हि, रजोहरणमिष्यते ॥

५

संपातिमादिसत्त्वानां, रक्षायै मुखवस्त्रिका ।
भक्तपानस्थजंतूनां, परीक्षायै च पात्रकम् ॥

६

समुद्राः स्थितिं मुञ्चन्ति, चलन्ति कुलपर्वताः ।
विचलति प्रलये नापि महतांगीकृतं व्रतम् ॥

७

चलेच्च मेरुः प्रचलेत्तु मन्दरं,
चलेत्तु ताराग्रहचन्द्रभानुः ।
कदापि काले पृथिवी चलेद्धि,
तथापि वाक्यं न चलेद्धि साधोः ॥

८

चक्षुर्भ्यां हसते विद्वान्, दन्तोद्घाटेन मध्यमाः ।
अधमा अट्टहासेन न हसन्ति मुनीश्वराः ॥

९

न च राजभयं न च चौरभयं,
न च वृत्तिभयं न वियोगभयम् ।
इहलोकसुखं परलोकहितं,
श्रमणत्वमिदं रमणीयतरम् ॥

१०

वित्ते त्यागः क्षमा शक्तौ, दुःखे दैन्यविहीनता ।
निर्दंभता सदाचारे, स्वभावोऽयं महात्मनाम् ॥

११

आशा नाम नदी मनोरथजला तृष्णातरङ्गाकुला ।
रागग्राहवती वितर्कविहगा धैर्यद्रुमध्वंसिनी ॥
मोहावर्तसुदुस्तराऽति गहना प्रोत्तुङ्ग चिन्तातटी ।
तस्याः पारगता विशुद्धमनसो नन्दन्ति योगीश्वराः ॥

१२

धैर्यं यस्य पिता क्षमा च जननी शान्तिश्चिरं गेहिनी ।
सत्यं सूनुरयं दया च भगिनी भ्राता मनः संयमः ॥
शय्या भूमितलं दिशोऽपि वसनं ज्ञानामृतं भोजन–
मेते यस्य कुटुम्बिनो वद सखे कस्माद्भयं योगिनः ॥

१३

कौपीनं शतखण्डजर्जरतरं कन्था पुनस्तादृशी ।
निश्चिन्तं सुखसाध्यभैक्षमशनं शय्या श्मशाने वने ॥
मित्रामित्रसमानता जिनपतेश्चिन्ताथ शून्यालये ।
स्वात्मानन्दमदप्रमोदमुदितो योगी सुखं तिष्ठति ॥

१४

"एकरात्रं वसेद् ग्रामे, पत्तने तु दिनत्रयम् ।
पुरे दिनद्वयं भिक्षुर्नगरे पञ्चरात्रकम्" ॥

१५

अद्वेष्टा सर्वभूतानां, मैत्रः करुण एव च ।
निर्ममो निरहंकारः, समदुःखसुखक्षमी ॥

१६

यथा चित्तं तथा वाचो, यथा वाचस्तथा क्रियाः ।
चित्ते वाचि क्रियायां च साधूनामेकरूपता ॥

१७

क्वचिद् भूमौ शय्या क्वचिदपि च पर्यङ्कशयनम् ।
क्वाचिच्छाकाहारी क्वचिदपि च शाल्योदनरुचिः ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्वचित्कंथाधारी क्वचिदपि च दिव्याम्बरधरो– ।
मनस्वी कार्यार्थी न गणयति दुःखं न च सुखम् ॥

१८

तुष्यन्ति भोजनैर्विप्राः, मयूरा घनगर्जितैः ।
साधवः परसंतोषैः, खलाः परविपत्तिषु ॥

१९

मक्षिका व्रणमिच्छन्ति, धनमिच्छन्ति पार्थिवाः ।
नीचाः कलहमिच्छन्ति, शान्तिमिच्छन्ति साधवः ॥

२०

बाह्य आध्यात्मिके वापि, दुःख उत्पादिते परैः ।
न कुप्यति न चाहंति, दम इत्यभिधीयते ॥

२१

न यमं यममित्याहु–रात्मा वै यम उच्यते ।
आत्मा संयमितो येन, तं यमः किं करिष्यति ? ॥

२२

उपकारिषु यः साधुः, साधुत्वे तस्य को गुणः ।
अपकारिषु यः साधुः, सः साधुः सद्भिरुच्यते ॥

२३

सुलभाः पुरुषा लोके, साधवः साधुकारिषु ।
असाधुषु पुनः साधुर्दुर्लभः पुरुषो भुवि ॥

२४

यस्य चित्तं द्रवीभूतं, कृपया सर्वजन्तुषु ।
स धन्यः संसृतौ पुण्यः, किं जटाभस्मवल्कलैः ॥

२५

गृहस्थानां सहस्रेण, वानप्रस्थशतेन च ।
ब्रह्मचारिसहस्रेण, योगाभ्यासी विशिष्यते ॥

२६

कृतार्थौ पितरौ तेन, धन्यो देशः कुलञ्च तत् ।
जायते योगवान्यत्र, दत्तमक्षय्यतां व्रजेत् ॥

२७

ब्रह्मचर्यमहिंसा च, सत्यास्तेयापरिग्रहान् ।
सेवेत योगी निष्कामो, योग्यतां मनसो नयन् ॥

२८

कर्मणा मनसा वाचा, परद्रव्येषु निःस्पृहा ।
अस्तेयमिति सम्प्रोक्तमृषिभिस्तत्त्वदर्शिभिः ॥

२९

जीयतां दुर्जया देहे, रिपवश्चक्षुरादयः ।
जितेषु तेषु लोकोऽयं, ननु कृत्स्नस्त्वया जितः ॥

३०

सुदुर्लभं प्राप्य मुनित्वमार्गं, मुञ्चन्ति मूढाः सुखदं सहासम् ।
ते यान्ति घोरं नरकं नरा हि, यथा प्रपेदे किल कुंडरीकः ॥

३१

परद्रव्येषु योऽन्धः स्यात्, परस्त्रीषु नपुंसकः ।
परापवादे यो मूकः, सर्वदा विजितेन्द्रियः ॥

३२

सुखिनो विषयतृप्ता, नेन्द्रोपेन्द्रादयोप्यहो ।
भिक्षुरेकः सुखी लोके, ज्ञानतृप्तो निरञ्जनः ॥

३३

यो दानमानस्तुतिवन्दनाभिर्न मोदतेन्यैर्न तु दुर्मनायते।
अलाभलाभादिपरीषहान् सहन्,
यतिः स तत्त्वादपरो विडम्बकः ॥

३४

सतां सदा शाश्वतधर्मवृत्तिः,
सन्तो न सीदन्ति न च व्यथन्ते ।
सतां सदा नाफलसङ्गमोऽस्ति,
सद्भ्यो भयं नानुभवन्ति सन्तः ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

३५

श्रीण्येव तु सतामाहुः, सन्तः पदमनुत्तमम् ।
न चैव द्रुह्याद्द्यात्सत्यं चैव सदा वदेत् ॥

३६

सर्वत्र दयावन्तः, सन्तः करुणवेदिनः ।
गच्छन्त्यतीव सन्तुष्टा, धर्म्यं पन्थानमुत्तमम् ॥

३७

विद्यामदो धनमदस्तृतीयोऽभिजनो मदः ।
मदा एतेऽवलिप्तानामेत एव सतां दमाः ॥

३८

यतो यतो निवर्तते, ततस्ततो विमुच्यते ।
निवर्तनाद्धि सर्वतो, न वेत्ति दुःखमण्वपि ॥

३९

कुलं पवित्रं जननी कृतार्था, वसुन्धरा पुण्यवती च तेन ।
अपारसंवित्सुखसागरेऽस्मिन्, लीनं परे ब्रह्मणि यस्य चेतः

४०

वज्रादपि कठोराणि, मृदूनि कुसुमादपि ।
लोकोत्तराणां चेतांसि, को हि विज्ञातुमर्हति ॥

४१

नोदेति नास्तमायाति, सुखे दुःखे मुखप्रभा ।
यथाप्राप्ते स्थितिर्यस्य, स जीवन्मुक्त उच्यते ॥

४२

शान्ता महान्तो निवसन्ति सन्तो,
वसन्तवल्लोकहितं चरन्तः ।
तीर्णाः स्वयं भीमभवार्णवं जनान्,
न हेतुनान्यानपि तारयन्तः ॥

४३

निर्वैरः सदयः शान्तो, दम्भाहङ्कारवर्जितः ।
निरपेक्षो मुनिर्वीतरागः साधुरिहोच्यते ॥

४४

न प्रहृष्यति सम्माने, नापमाने च कुप्यति ।
न क्रुद्धः परुषं ब्रूयादेतद्धि साधुलक्षणम् ॥

४५

परोपकारैकधियः, स्वसुखाय गतस्पृहाः ।
जगद्धिताय जायन्ते, साधवस्तादृशा भुवि ॥

४६

इन्द्रोऽपि न सुखी, तादृग्यादृग्भिक्षुस्तु निःस्पृहः ।
कोऽन्यः स्यादिह संसारे, त्रिलोकीविभवे सति ॥

४७

रात्रिश्चन्द्रमसा विनाऽब्जनिवहैर्नो भाति पद्माकरो ।
यद्वत्पण्डितलोकवर्जितसभा दंतीव दन्तं विना ॥
पुष्पं गंधविवर्जितं मृतपतिस्त्रीवेह तद्वन्मुनिः ।
चारित्रेण विना न भाति सततं यद्यप्यसौ शास्त्रवान् ॥

४८

देहे निर्ममता गुरौ विनयता नित्यं श्रुताभ्यासता ।
चारित्रोज्ज्वलता महोपशमता संसारनिर्वेगता ॥
अंतर्बाह्यपरिग्रहत्यजनता धर्मज्ञता साधुता ।
साधो ! साधुजनस्य लक्षणमिदं संसारविच्छेदकृत् ॥

४९

निरीहा निरहङ्कारा, निर्ममाः समचेतसः ।
महाव्रतधरा धीराः, साधवः शरणं मम ॥

५०

सम्यग्ज्ञानी दयावांस्तु, ध्यानी यस्तप्यते तपः ।
नग्नश्चीवरधारी वा स सिध्यति महामुनिः ॥

५१

न यस्य मित्रं न च कोऽपि शत्रुर्निजः,
परो वाऽपि न कश्चनास्ते ।


१७

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न चेन्द्रियार्थेषु रमेत चेतः,
कषायमुक्तं परमः स योगी ॥

५२

समः शत्रौ च मित्रे च, तथा मानापमानयोः ।
शीतोष्णसुखदुःखेषु, समः सङ्गविवर्जितः ॥

५३

दुःखेष्वनुद्विग्नमनाः, सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः, स्थितधीर्मुनिरुच्यते ॥

५४

ये न हृष्यन्ति लाभेषु, नालाभेषु व्यथन्ति च ।
निर्ममा निरहङ्काराः सत्त्वस्थाः समदर्शिनः ॥

५५

यः समः सर्वभूतेषु, त्रसेषु स्थावरेषु च ।
तपश्चरति शुद्धात्मा, श्रमणोऽसौ प्रकीर्त्तितः ॥

५६

मित्रे नन्दति नैव नैव पिशुने वैरातुरो जायते,
भोगं लुभ्यति नैव नैव तपसि क्लेशं समालम्बते ।
रत्ने रज्यति नैव नैव दृषदि प्रद्वेषमापद्यते,
येषां शुद्धहृदां सदैव हृदयं ते योगिनो योगिनः ॥

५७

आत्मौपम्येन सर्वत्र, समं पश्यति योऽर्जुन ! ।
सुखं वा यदि वा दुःखं, स योगी परमो मतः ॥

५८

न देवराजस्य न चक्रवर्तिनस्तद्धि सुखं रागयुतस्य मन्ये ।
यद्वीतरागस्य मुनेः सदात्मनिष्ठस्य चित्ते स्थिरतां प्रयाति

५९

सत्यं माता पिता ज्ञानं, धर्मो भ्राता दया सखा ।
शान्तिः पत्नी क्षमा पुत्रः षडेते मम बान्धवाः ॥

६०

पिता योगाभ्यासो विषयविरतिः सा च जननी,
विवेकः सोदर्यः प्रतिदिनमनीहा च भगिनी ।
प्रिया क्षान्तिः पुत्रो विनय उपकारः प्रियसुहृत्,
सहायो वैराग्यं गृहमुपशमो यस्य स सुखी ॥

६१

सूक्ष्माणि जन्तूनि जलाश्रयाणि,
जलस्य वर्णाकृतिसंस्थितानि ।
तस्माज्जलं जीवदयानिमित्तं,
निर्ग्रन्थशूराः परिवर्जयन्ति ॥

६२

अष्टौ मासान् विहारः स्याद्यतीनां संयतात्मनाम् ।
एकत्र चतुरो मासान्, वार्षिकान् निवसेत् पुनः ॥

६३

मौनान्न मुनिर्भवति, नारण्यवसनान्मुनिः ।
स्वलक्षणं तु यो वेत्ति स मुनिः श्रेष्ठ उच्यते ॥

६४

स्वैरं विहरति स्वैरं शेते स्वैरं च जल्पति ।
भिक्षुरेकः सुखी लोके राजचौरभयोज्झितः ॥

६५

अस्मिन्नपारसंसारे सागरे मज्जतां सताम् ।
किं समालम्बनं साधो ! रागद्वेषपरिक्षयः ॥

## दान महिमा ।

१

दानं दारिद्र्यनाशाय, शीलं दुर्गतिनाशनम् ।
तपः कर्मविनाशाय, भावना भवनाशिनी ॥

२

गौरवं प्राप्यते दानान्न तु वित्तस्य संचयात् ।
स्थितिरुच्चैः पयोदानां, पयोधीनामधः स्थितिः ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

३

दातव्यमिति यद्दानं, दीयतेऽनुपकारिणे ।
देशे काले च पात्रे च, तद्दानं सात्विकं विदुः ॥

४

दरिद्रान् भर कौन्तेय, मा प्रयच्छेश्वरे धनम् ।
व्याधितस्यौषधं पथ्यं, नीरुजस्य किमौषधैः ? ॥

५

उपार्जितानां वित्तानां, त्याग एव हि रक्षणम् ।
तडागोदरसंस्थानां, परीवाह इवाम्भसाम् ॥

६

दानं भोगो नाशस्तिस्रो, गतयो भवन्ति वित्तस्य ।
यो न ददाति न भुङ्क्ते, तस्य तृतीया गतिर्भवति ॥

७

यो न ददाति न भुङ्क्ते, सति विभवे नैव तस्य तद्द्रव्यम्
तृणमयकृत्रिमपुरुषो, रक्षति शस्यं परस्यार्थे ॥

८

दातव्यं भोक्तव्यं, सति विभवे संचयो न कर्तव्यः ।
पश्येह मधुकरीणां, संचितमर्थं हरन्त्यन्ये ॥

९

दानेन भूतानि वशीभवन्ति,
दानेन वैराण्यपि यान्ति नाशम् ।
परोऽपि बन्धुत्वमुपैति दानैर्दानं हि–
सर्वव्यसनानि हन्ति ॥

१०

तुरगशतसहस्रं गोगजानां च लक्षं,
कनकरजतपात्रं मेदिनी सागरान्ता ।
सुरयुवतिसमानं कोटिकन्याप्रदानं,
न हि भवति समानं चान्नदानात्प्रधानम् ॥

११

दीनदुःस्थितदारिद्र्यप्राप्तानां प्राणिनां सदा ।
दुःखस्य वारणे वाञ्छा, सानुकम्पाभिधीयते ॥

१२

तत्र न्यायार्जितं क्षेत्रे, कालभावैरदुःखितं ।
देयं धर्मार्थिना दानम्, विना कीर्त्यादिकारणम् ॥

१३

दानेन पञ्चमश्चक्री, दानेन प्रथमो जिनः ।
दानेन संगमो भोगी, दानेन कृतपुण्यकः ॥

१४

इयं मोक्षफले दाने, पात्रापात्रविचारणा ।
दयादानं तु सर्वज्ञैः, कुत्राऽपि न निषिध्यते ॥

१५

तृणाहारी पयःस्नेही, पयोऽहारी विषप्रदः ।
अंतरं पात्राऽपात्राणां, धेनुपन्नगयोरिव ॥

१६

दीनदानाद्भवेद्भोगी, सुखी सत्पात्रदानतः ।
अभीतिदानाद्दीर्घायुः, ज्ञानी स्यात् ज्ञानदानतः ॥

१७

दानं च निजहस्तेन, मातुर्हस्तेन भोजनम् ।
तिलकं स्वसृहस्तेन, परहस्तेन मर्दनम् ॥

१८

कुभोजने दिनं नष्टं, कुनार्या यौवनं हतम् ।
कुपुत्रेण कुलं नष्टं, धनं नष्टं न दीयते ॥

१९

शुध्यति भस्मना कांस्यं, नारी शीलेन शुध्यति ।
शुध्यति तपसा साधुर्गृही दानेन शुध्यति ॥


१६

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

२०

योजने श्रूयते भेरी, मेघो द्वादश योजने ।
दातारो दानशब्देन, श्रूयन्ते सचराचरे ॥

२१

उष्णकाले तक्रदानं, वर्षाकाले च मन्दिरम् ।
शीतकाले वस्त्रदानं, सर्वकाले च भोजनम् ॥

२२

व्याजे स्याद्द्विगुणं वित्तं, व्यवसाये चतुर्गुणम् ।
क्षेत्रे शतगुणं प्रोक्तं, पात्रेऽनंतगुणं भवेत् ॥

२३

आकाशे तारकासंख्या तृणसंख्या महीतले ।
गङ्गायां वालुकासंख्या पात्रसंख्या न विद्यते ॥

२४

चित्तं वित्तं च पात्रं च, त्रयमेकत्र सङ्गतम् ।
दुर्लभं लभ्यते येन, तज्जन्म सफलं मतम् ॥

२५

अनादरो विलम्बश्च, वैमुख्यं निष्ठुरं वचः ।
पश्चात्तापश्च पञ्चापि, दानस्य दूषणानि च ॥

२६

आनंदोऽश्रूणि रोमाञ्चो, बहुमानः प्रियं वचः ।
तथानुमोदना पात्रे, दानभूषणपञ्चकम् ॥

२७

भाक्तिकं तौष्टिकं श्राद्धं, सविज्ञानमलोलुपम् ।
सात्त्विकं क्षमकं सन्तो, दातारं सप्तधा विदुः ॥

२८

किं द्रव्येण कुबेरस्य, किं समुद्रस्य वारिणा ।
किं गृहेण गृहस्थस्य, भुक्तिर्यत्र न योगिनाम् ॥

२९

ध्यानेन शोभते योगी, संयमेन तपोधनः ।
सत्येन वचसा राजा, गृही दानेन चारुणा ॥

३०

काले ददाति योऽपात्रे, वितीर्णं तस्य नश्यति ।
निक्षिप्तमूषरे बीजं, किं कदाचिदवाप्यते ॥

३१

ताडनं पीडनं स्तेयं, रोषणं दूषणं भयम् ।
यः कृत्वा ददते दानं, स दाता न मतो जिनैः ॥

३२

दानतो वैरिणोऽपि स्युर्मित्राण्येव न संशयः ।
दाने सर्वमिदं विश्वं, प्रतितिष्ठति सर्वदा ॥

३३

प्रशंसन्ति प्रजा नित्यं, कर्णबल्यादिकानिह ।
वदान्या दानतः स्वर्गं, व्रजन्ति सततं नराः ॥

३४

दानेन प्राप्यते स्वर्गो, दानेन सुखमश्नुते ।
इहामुत्र च दानेन, पूज्यो भवति मानवः ॥

३५

यद्ददाति यदश्नाति, तदेव धनिनो धनम् ।
अन्ये मृतस्य क्रीडन्ति, दारैरपि धनैरपि ॥

३६

भवन्ति नरकाः पापात्पापं दारिद्र्यसंभवम् ।
दारिद्र्यमप्रदानेन, तस्माद्दानपरो भवेत् ॥

३७

द्वाविमौ पुरुषौ राजन्, स्वर्गस्योपरि तिष्ठतः ।
प्रभुश्च क्षमया युक्तो, दरिद्रश्च प्रदानवान् ॥


२०

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

३८

दानं प्रियवाक्सहितं, ज्ञानमगर्वं क्षमाऽन्वितं शौर्यम् ।
वित्तं दानसमेतं दुर्लभमेतच्चतुर्भद्रम् ॥

३९

अपात्रेभ्यस्तु दत्तानि, दानानि सुबहून्यपि ।
वृथा भवन्ति राजेन्द्र !, भस्मन्याज्याहुतिर्यथा ॥

४०

पात्रेभ्यो दीयते नित्यमनपेक्ष्य प्रयोजनम् ।
केवलं त्यागबुद्ध्या यत्, धर्मदानं तदुच्यते ॥

४१

अभिगम्योत्तमं दानमाहूतञ्चैव मध्यमम् ।
अधमं याच्यमानं स्यात् सेवादानन्तु निष्फलम् ॥

४२

दानं वाचस्तथा बुद्धेर्वित्तस्य विविधस्य च ।
शरीरस्य च कुत्रापि, केचिदिच्छन्ति पण्डिताः ॥

४३

गोदुग्धं वाटिकापुष्पं, विद्या कूपोदकं धनम् ।
दानाद्विवर्द्धते नित्यमदानाच्च विनश्यति ॥

४४


देयं भेषजमार्तस्य, परिश्रान्तस्य चासनम् ।
तृषितस्य च पानीयं, क्षुधितस्य च भोजनम् ॥

४५

अभयान्नौषधज्ञान-भेदतस्तच्चतुर्विधम् ।
दानं निगद्यते सद्भिः, प्राणिनामुपकारकम् ॥

४६

पूजायामपमाने, सौख्ये दुःखे समागमे विगमे ।
क्षुभ्यति यस्य न चेतो, पात्रमसावुत्तमः साधुः ॥

४७

आदेयः सुभगः सौम्यस्त्यागी भोगी यशोनिधिः ।
भवत्यभयदानेन, चिरजीवी निरामयः ॥

४८

यत्फलं ददतः पृथ्वीं, प्रासुकं यच्च भोजनम् ।
अनयोरन्तरं मन्ये, तृणाब्धिजलयोरिव ॥

४९

सर्वेषु गात्रेषु शिरः प्रधानं,
सर्वेन्द्रियाणां नयनं प्रधानम् ।
सर्वेषु पेयेषु पयः प्रधानम्,
सर्वौषधीनामशनं प्रधानम् ॥

५०

न गोप्रदानम् न महीप्रदानम्,
न चान्नदानं हि तथा प्रधानम् ।
यथा वदन्तीह बुधाः प्रधानं,
सर्वप्रदानेष्वभयप्रदानम् ॥

५१

श्रीनाभेयजिनेश्वरो धनभवे श्रेयः श्रियामाश्रयः ।
श्रेयांसः स च मूलदेवनृपतिः सा नन्दना चन्दना ॥
धन्योऽयं कृतपुण्यकः शुभमनाः श्रीशालिभद्रादिकः ।
सर्वेप्युत्तमदानमानविधिना जाता जगद्विश्रुताः ॥

५२

दानं ख्यातिकरं सदा हितकरं संसारसौख्याकरं ।
नृणां प्रीतिकरं गुणाकरकरं लक्ष्मीकरं किङ्करं ॥
स्वर्गावासकरं गतिक्षयकरं निर्वाणसम्पत्करं ।
वर्णायुर्बलबुद्धिवर्द्धनकरं दानं प्रदेयं बुधैः ॥

५३

देयं भो ह्यधने धनं सुकृतिभिर्नो सञ्चितं सर्वदा ।
श्रीकर्णस्य बलेश्च विक्रमपतेरद्यापि कीर्तिः स्थिता ॥
आश्चर्यं मधु दानभोगरहितं नष्टं चिरात् सञ्चितम् ।
निर्वेदादिति पाणिपादयुगलं घर्षन्त्यहो मक्षिकाः ॥

५४

शतेषु जायते शूरः सहस्रेषु च पण्डितः ।
वक्ता शतसहस्रेषु, दाता भवति वा न वा ॥ 

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

५५
न रणे विजयाच्छूरोऽध्ययनान्न च पण्डितः ।
न वक्ता वाक्पटुत्वेन, न दाता चार्थदानतः ॥

५६
इन्द्रियाणां जये शूरो, धर्मं चरति पण्डितः ।
हितप्रायोक्तिभिर्वक्ता, दाता सन्मानदानतः ॥

५७
मातापित्रोर्गुरौ मित्रे, विनीते चोपकारिणि ।
दीनानाथविशिष्टेषु, दत्तं तत्सफलं भवेत् ॥

५८
न्यायागतेन द्रव्येण, कर्त्तव्यं पारलौकिकम् ।
दानं हि विधिना देयं, काले पात्रे गुणान्विते ॥

५९
मिथ्यादृष्टिसहस्रेभ्यो, वरमेको जिनाश्रयी ।
जिनाश्रयिसहस्रेभ्यो, वरमेको अणुव्रती ॥

६०
अणुव्रतिसहस्रेभ्यो, वरमेको महाव्रती ।
महाव्रतिसहस्रेभ्यो, वरमेको जिनेश्वरः ॥

६१
जिनेश्वरसमं पात्रं, न भूतो न भविष्यति ।
अतः पात्रविशेषेण, देयं दानं शुभात्मभिः ॥

६२
पात्रे त्यागी गुणे रागी, भोगी परिजनैः सह ।
शास्त्रे बोद्धा रणे योद्धा, पुरुषः पञ्चलक्षणम् ॥

६३
श्रीवृद्धिर्नखवच्छेद्या, नैव धार्या कदाचन ।
प्रमादात् स्खलिते क्वापि, समूला सा विनश्यति ॥

६४
हस्तस्य भूषणं दानं, सत्यं कण्ठस्य भूषणम् ।
श्रोत्रस्य भूषणं शास्त्रं, भूषणे किं प्रयोजनम् ॥

६५
दानेन प्राप्यते स्वर्गो दानेन सुखमश्नुते ।
इहामुत्र च दानेन पूज्यो भवति मानवैः ॥

६६
सार्थः प्रवसतो मित्रं, भार्या मित्रं गृहे सतः ।
आतुरस्य भिषङ् मित्रं, दानं मित्रं मरिष्यतः ॥

६७
अन्नदातुरधस्तीर्थ--करोऽपि कुरुते करं ।
तच्च दानं भवेत् पात्र-दत्तं बहुफलं यतः ॥

६८
अल्पमपि क्षितौ, क्षिप्तं वटबीजं प्रवर्धते ।
जलयोगात् यथा दानात्, पुण्यवृक्षोऽपि वर्धते ॥

६९
हस्तादपि न दातव्यं, गृहादपि न दीयते ।
परोपकरणार्थाय, वचने का दरिद्रता ॥

७०
सुक्षेत्रे वापयेद्बीजं, सुपात्रे निक्षिपेद्धनम् ।
सुक्षेत्रे च सुपात्रे च, ह्युप्तं दत्तं न नश्यति ॥

७१
संग्रहैकपरः प्राप, समुद्रोऽपि रसातलम् ।
दाता तु जलदः पश्य, भुवनोपरि गर्जति ॥

७२
कदर्योपात्तवित्तानां, भोगो भाग्यवतां भवेत् ।
दन्ता दलन्ति कष्टेन, जिह्वा गिलति लीलया ॥

७३
उत्तमोऽप्रार्थितो दत्ते, मध्यमः प्रार्थितः पुनः ।
याचकैर्याच्यमानोऽपि, दत्ते न त्वधमाधमः ॥

७४
गर्जित्वा बहुदूरमुन्नति-भृतो मुञ्चन्ति मेघा जलं ।
भद्रस्यापि गजस्य दानसमये संजायतेऽन्तर्मदः ॥

७५
पुष्पाडम्बरयापनेन ददति प्रायः फलानि द्रुमाः ।
नो छेको न मदो न कालहरणं दानप्रवृत्तौ सताम् ॥



For Private And Personal Use Only

७६

धिग् धिग् दानमसत्कारं, पौरुषं धिक्कलङ्कितम् ।
जीवितं मानहीनं धिग्, धिक्कन्यां बहुभाषिणीम् ॥

७७

प्रियवाक्यप्रदानेन, सर्वे तुष्यन्ति जन्तवः ।
तस्मात्तदेव वक्तव्यं, वचने का दरिद्रता ॥

७८

उपभोक्तुं न जानाति, श्रियं प्राप्यापि मानवः ।
आकण्ठं जलमग्नोऽपि, श्वा हि लेढ्येव जिह्वया ॥
जले तैलं खले गुह्यं, पात्रे दानं मनागपि ।
प्राज्ञे शास्त्रं स्वयं याति, विस्तारं वस्तुशक्तितः ॥

७९

अहो एषां वरं जन्म, सर्वप्राण्युपजीवनम् ।
धन्या महीरुहा येभ्यो, निराशा यान्ति नार्थिनः ॥

८०

छायामन्यस्य कुर्वन्ति, तिष्ठन्ति स्वयमातपे ।
फलान्यपि परार्थाय, वृक्षाः सत्पुरुषा इव ॥

८१

हस्तौ दानविवर्जितौ श्रुतिपुटौ सारश्रुतिद्रोहिणौ ।
नेत्रे साधुविलोकनेन रहिते पादौ न तीर्थं गतौ ॥
अन्यायार्जितवित्तपूर्णमुदरं गर्वेण तुङ्गं शिरो ।
रेरे जम्बुक ! मुञ्च मुञ्च सहसा नीचस्य निंद्यं वपुः ॥

८२

यदि तात ! धनं नास्ति, पूर्वदुष्कृतकर्मणा ।
तथापि ललिता वाणी, वचने का दरिद्रता ॥

८३

दाता नीचोऽपि सेव्यः स्यान्निष्फलो न महानपि ।
जलार्थी वारिधिं त्यक्त्वा, पश्य कूपं निषेवते ॥

८४

रक्षन्ति कृपणाः पाणौ, द्रव्यं प्राणमिवात्मनः ।
तदेव सन्तः सततमुत्सृजन्ति यथा मलम् ॥

८५

अर्थिप्रश्नकृतौ लोके, सुलभौ तौ गृहे गृहे ।
दाता चोत्तरदश्चैव, दुर्लभौ पुरुषौ भुवि ॥

८६

नाना दानं मया दत्तं, रत्नानि विविधानि च ।
नो दत्तं मधुरं वाक्यं, तेनाहं शूकरो मुखे ॥

८७

पश्य सङ्गमको नाम, सम्पदं वत्सपालकः ।
चमत्कारकरीं प्राप, मुनिदानप्रभावतः ॥

८८

अशनादीनि दानानि, धर्मोपकरणानि च ।
साधुभ्यः साधुयोग्यानि, देयानि विधिना बुधैः ॥

८९

यदि चास्तमिते सूर्ये, न दत्तं धनमर्थिनाम् ।
तद्धनं नैव जानामि, प्रातः कस्य भविष्यति ॥

९०

मायाऽहंकारलज्जाभिः, प्रत्युपक्रिययाऽथवा ।
यत्किंचिद्दीयते दानं, न तद्धर्मस्य साधकम् ॥

९१

सुदानात् प्राप्यते भोगः, सुदानात् प्राप्यते यशः ।
सुदानाज्जायते कीर्तिः, सुदानात् प्राप्यते सुखम् ॥

९२

फलं यच्छति दातृभ्यो, दानं नात्रास्ति संशयः ।
फलं तुल्यं ददात्येतदाश्चर्यं त्वनुमोदकम् ॥

९३

दानेन शत्रून् जयति, व्याधिर्दानेन नश्यति ।
दानेन लभ्यते विद्या, दानेन युवतीजनः ॥

९४

सुपात्रदानाच्च भवेद्धनाढ्यो, धनप्रभावेण करोतिपुण्यम् ।
पुण्यप्रभावात् सुरलोकवासी, पुनर्धनाढ्यः पुनरेव भोगी



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

१५

कुपात्रदानाच्च भवेद्दरिद्रो, दारिद्र्यदोषेण करोति पापम् ।
पापप्रभावान्नरकं प्रयाति, पुनर्दरिद्रः पुनरेव पापी ॥

१६

चारित्रं चिनुते तनोति विनयं ज्ञानं नयत्युन्नतिं ।
पुष्णाति प्रशमं तपः प्रबलयत्युल्लासयत्यागमम् ॥
पुण्यं कन्दलयत्यघं दलयति स्वर्गं ददाति क्रमा–
न्निर्वाणश्रियमातनोति निहितं पात्रे पवित्रं धनम् ॥

१७

सत्पात्रं महती श्रद्धा काले देयं यथोचितम् ।
धर्मसाधनसामग्री धन्यास्येयं प्रजायते ॥

## अभय दान ।

१

जीवानां रक्षणं श्रेष्ठं जीवा जीवितकांक्षिणः ।
तस्मात्समस्तदानेभ्योऽभयदानं प्रशस्यते ॥

२

न स्वर्गे ब्रह्मलोके वा तत्सुखं प्राप्यते नरैः ।
यदार्तजन्तुनिर्वाणदानोत्थमिति मे मतिः ॥

३

मार्यमाणस्य हेमाद्रिं राज्यं वाऽथ प्रयच्छतु ।
तदनिष्टं परित्यज्य जीवो जीवितुमिच्छति ॥

४

वरमेकस्य सत्त्वस्य दत्ता ह्यभयदक्षिणा ।
न तु विप्रसहस्रेभ्यो गोसहस्रमलङ्कृतम् ॥

५

हेमधेनुधरादीनां दातारः सुलभा भुवि ।
दुर्लभः पुरुषो लोके यः प्राणिष्वभयप्रदः ॥

६

यो दद्यात् काञ्चनं मेरुं कृत्स्नां चैव वसुन्धराम् ।
एकस्य जीवितं दद्यान्न च तुल्यं युधिष्ठिर ॥

७

दत्तमिष्टं तपस्तप्तं तीर्थसेवा तथा श्रुतम् ।
सर्वेऽप्यभयदानस्य कलां नार्हन्ति षोडशीम् ॥

८

महतामपि दानानां कालेन क्षीयते फलम् ।
भीताऽभयप्रदानस्य क्षय एव न विद्यते ॥

९

एकतः काञ्चनो मेरुर्बहुरत्ना वसुंधरा ।
एकतो भयभीतस्य प्राणिनः प्राणरक्षणम् ॥

१०

यो भूतेष्वभयं दद्याद् भूतेभ्यस्तस्य नो भयम् ।
यादृग् वितीर्यते दानं तादृगासाद्यते फलम् ॥

११

अभयं सर्वसत्त्वेभ्यो यो ददाति दयापरः ।
तस्य देहाद्विमुक्तस्य भयं नास्ति कुतश्चन ॥

१२

यो ददाति सहस्राणि गवामश्वशतानि च ।
अभयं सर्वसत्त्वेभ्यस्तद्दानमिति चोच्यते ॥

१३

भूताभयप्रदानेन सर्वान्कामानवाप्नुयात् ।
दीर्घमायुश्च लभते सुखी चैव सदा भवेत् ॥

## शीलम् ।

१

धीशानां भूषणं विद्या, मंत्रिणां भूषणं नृपः ।
भूषणं च पतिः स्त्रीणां, शीलं सर्वस्व भूषणं ॥

२

'ब्रह्मचर्यं सदा रक्षे–दष्टधा मैथुनं पृथक् ।
स्मरणं कीर्तनं केलिः, प्रेक्षणं गुह्यभाषणम् ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

३

संकल्पोऽध्यवसायश्च, क्रियानिष्पत्तिरेव च ।
एतन्मैथुनमष्टांगं, प्रवदन्ति मनीषिणः' ॥

४

वरं प्रवेष्टुं ज्वलितं हुताशनं,
न चापि भग्नं चिरसंचितं व्रतम् ।
वरं हि मृत्युः सुविशुद्धचेतसः,
न चापि शीलस्खलितस्य जीवनम् ॥

५

शीलं नाम नृणां कुलोन्नतिकरं शीलं परं भूषणम् ।
शीलं चाशु करोति पावकजलं शीलं सुगत्यावहं ॥
शीलं दुर्गतिनाशनं च विपुलं शीलं यशः पावनं ।
शीलं निर्वृतिहेतुरेव परमं शीलं तु कल्पद्रुमः ॥

६

शीलेन रक्षितो जीवो, न केनाऽप्यभिभूयते ।
महाहृदनिमग्नस्य, किं करोति दवानलः ॥

७

बान्धवाः सुहृदः सर्वे निःशीलस्य पराङ्मुखाः ।
शत्रवोऽपि दुराराध्याः, संमुखाः सन्ति शीलिनः ॥

८

ख्यातः श्रेष्ठिसुदर्शनश्च विजयश्रेष्ठिस्तथा नारदः ।
सीता राजमती सती च सुलसा चूला सुभद्रा पुनः ॥
कौशल्या च मृगावती धृतिमति पद्मावती द्रौपदी ।
शीलेन प्रतिपेदिरे शुभगतिं प्राप्य प्रतिष्ठां पराम् ॥

९

किं कुलेन विशालेन, शीलमेवात्र कारणम् ।
कृमयः किं न जायन्ते, कुसुमेषु सुगन्धिषु ॥

१०

अद्रोहः सर्वभूतेषु, कर्मणा मनसा गिरा ।
अनुग्रहश्च दानञ्च, शीलमेतद्विदुर्बुधाः ॥

११

विदेशेषु धनं विद्या व्यसनेषु धनं मतिः ।
परलोके धनं धर्मः, शीलं सर्वत्र वै धनम् ॥

१२

एकमेव व्रतं श्लाघ्यं, ब्रह्मचर्यं जगत्त्रये ।
यद्विशुद्धिं समापन्नाः, पूज्यन्ते पूजितैरपि ॥

१३

अभिवादनशीलस्य, नित्यं वृद्धोपसेविनः ।
चत्वारि तस्य वर्धन्ते, आयुर्विद्या यशो बलम् ॥

१४

शीलतो न परो बन्धुः, शीलतो न परः सुहृत् ।
शीलतो न परा माता, शीलतो न परः पिता ॥

१५

भंगस्थानपरित्यागी, व्रतं पालयतेऽमलम् ।
तस्करैर्लुट्यते कुत्र, दूरतोऽपि पलायितः ॥

१६

शौचानां परमं शौचं, गुणानां परमो गुणः ।
प्रभावो महिमा धाम, शीलमेकं जगत्त्रये ॥

१७

व्यर्थं मानजीवनं सविभवं शीलं विना शोभनम् ।
व्यर्था शीलगुणं विना निपुणता शास्त्रेकलायां तथा ॥
व्यर्थं साधुपदं च नायकपदं शीलं यदा खण्डितम् ।
सेवाधर्मसमादरो न सुलभः शीलं व्रतं चान्तरा ॥

१८

ऐश्वर्यस्य विभूषणं सुजनता शौर्यस्य वाक्संयमो ।
ज्ञानस्योपशमः कुलस्य विनयो वित्तस्य पात्रे व्ययः ॥
अक्रोधस्तपसः क्षमा बलवतां धर्मस्य निर्व्याजता ।
सर्वेषामपि सर्वकारणमिदं शीलं परं भूषणम् ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

१९

वह्निस्तस्य जलायते जलनिधिः कुल्यायते तत्क्षणा-
न्मेरुः स्वल्पशिलायते मृगपतिः सद्यः कुरङ्गायते ॥
व्यालो माल्यगुणायते विषरसः पीयूषवर्षायते ।
यस्यांगेऽखिललोकवल्लभतमं शीलं समुन्मीलति ॥

२०

वेश्या रागवती सदा तदनुगा षड्भीरसैर्भोजनम् ।
सौधं धाम मनोहरं वपुरहो नव्यो वयःसंगमः ॥
कालोऽयं जलदाविलस्तदपि यः कामं जिगायादरात् ।
तं वन्दे युवतीप्रबोधकुशलम् श्रीस्थूलिभद्रं मुनिम् ॥

२१

व्रतानामपि शेषाणां, चतुर्थव्रतभङ्गके ।
लीलया भेदतामाहुस्तस्माद् दुःशीलतां त्यजेत् ॥

२२

पृथ्वी सत्पुरुषं विना न रुचिरा चन्द्रं विना शर्वरी ।
लक्ष्मीर्दानगुणं विना वनलता पुष्पं फलं वा विना ॥
आदित्येन विना दिनं सुखकरं पुत्रं विना सत्कुलम् ।
धर्मो नैव धृतः सदा श्रुतधरैः शीलं विना शोभते ॥

२३

न मुक्ताभिर्न माणिक्यैर्न वस्त्रैर्न परिच्छदैः ।
अलङ्क्रियेत शीलेन केवलेन हि मानवः ॥

२४

अग्निर्जलं द्विषन्मित्रं, तालपुटं सुधानिभम् ।
सिन्धुः स्थलं गिरिर्भूमिर्हेतुः शीलस्य तत्र च ॥

२५

निशानां च दिनानां च, यथा ज्योतिर्विभूषणम् ।
सतीनां च यतीनां च तथा शीलमखण्डितम् ॥

२६

अमराः किङ्करायन्ते, सिद्धयः सह सङ्गताः ।
समीपस्थायिनी संपच्छीलालङ्कारशालिनाम् ॥

२७

दत्तस्तेन जगत्यकीर्तिपटहो गोत्रे मषीकूर्चकः ।
चारित्रस्य जलाञ्जलिर्गुणगणारामस्य दावानलः ॥
सङ्केतः सकलापदां शिवपुरद्वारे कपाटो दृढः ।
शीलं येन निजं विलुप्तमखिलं त्रैलोक्यचिन्तामणिः ॥

## तप ।

१

विशुद्ध्यति हुताशेन सदोषमपि काञ्चनम् ।
तद्वत् तथैव जीवोऽयं तप्यमानस्तपोऽग्निना ॥

२

यत्र ब्रह्म-जिनार्चा च, कषायाणां तथा हतिः ।
सानुबन्धा जिनाज्ञा च, तत्तपः शुद्धमिष्यते ॥

३

यस्माद्विघ्नपरम्परा विघटते दास्यं सुराः कुर्वते ।
कामः शाम्यति दाम्यतीन्द्रियगणः कल्याणमुत्सर्पति ॥
उन्मीलन्ति महर्द्धयः कलयति ध्वंसं च यत्कर्मणां ।
स्वाधीनं त्रिदिवं करोति च शिवं श्लाघ्यं तपस्तप्यताम् ॥

४

तनोति धर्मं विधुनोति कल्मषं,
हिनस्ति दुःखं विदधाति संमदम् ।
चिनोति सत्त्वं विनिहन्ति तामसं,
तपोऽथवा किं न करोति देहिनाम् ॥

५

कान्तारं न यथेतरो ज्वलयितुं दक्षो दवाग्निं विना ।
दावाग्निं न यथेतरः शमयितुं शक्तो विनाम्भोधरम् ॥
निष्णातं पवनं विना निरसितुं नान्यो यथाऽम्भोधरम् ।
कर्मौघं तपसा विना किमपरं हर्तुं समर्थं तथा ॥

६

उप-समीपे यो वासो, निजात्म-परमात्मनोः ।
उपवासः स विज्ञेयो, न तु कायस्य शोषणम् ॥


२६

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

७

मासपक्षोपवासेन, मन्यन्ते यत्तपो जनाः ।
आत्मविद्योपघातस्तु, न तपस्तत्सतां मतम् ॥

८

विषयाशावशातीतो, निरारम्भोऽपरिग्रहः ।
ज्ञानध्यानतपोरक्तस्तपस्वी सः प्रशस्यते ॥

९

रागद्वेषौ यदि स्यातां, तपसा किं प्रयोजनम् ।
तावेव यदि न स्यातां, तपसा किं प्रयोजनम् ॥

१०

अहिंसा सत्यवचनमानृशंस्यं दमो घृणा ।
एतत्तपो विदुर्धीरा, न शरीरस्य शोषणम् ॥

११

यद् दूरं यद् दुराराध्यं, यच्च दूरे व्यवस्थितम् ।
तत्सर्वं तपसा साध्यं, तपो हि दुरतिक्रमम् ॥

१२

नन्दीषेणदृढप्रहारिजुठला धन्यो मुनिर्ढंढणः ।
चाण्डालो हरकेशिनामविदितो भूपः प्रदेशी तथा ॥
एकस्त्रीनरषट्कहा प्रतिदिनं क्रूरोऽर्जुनो मालिकः ।
कृत्वा क्षान्तियुतं तपो हतमला एते गताः सद्गतिम् ॥

१३

सदोषमपि दीप्तेन, सुवर्णं वह्निना यथा ।
तपोऽग्निना तप्यमानस्तथा जीवो विशुध्यति ॥

१४

क्षान्त्या शुध्यन्ति विद्वांसो, दानेनाकार्यकारिणः ।
प्रच्छन्नपापा जापेन, तपसा सर्व एव हि ॥

१५

मलं स्वर्णगतं वह्निर्हंसः क्षीरगतं जलम् ।
यथा पृथक्करोत्येवं, जन्तोः कर्ममलं तपः ॥

१६

अनशनमूनोदरता, वृत्तेः संक्षेपणं रसत्यागः ।
कायक्लेशः संलीनतेति बाह्यं तपः प्रोक्तम् ॥

१७

प्रायश्चित्तं वैयावृत्त्यं स्वाध्यायो विनयोऽपि च ।
व्युत्सर्गोऽथ शुभध्यानं षोढेत्याभ्यन्तरं तपः ॥

१८

मनःप्रसादः सौम्यत्वं, मौनमात्मविनिग्रहः ।
भावसंशुद्धिरित्येतत्, तपो मानसमुच्यते ॥

१९

यत्किंचित् त्रिषु लोकेषु, प्रार्थयन्ति नराः सुखम् ।
तत्सर्वं तपसा साध्यं, तपो हि दुरतिक्रमम् ॥

## भाव ।

१

मा कार्षीत् कोपि पापानि, मा च भूत् कोपि दुःखितः ।
मुच्यतां जगदप्येषा, मतिर्मैत्री निगद्यते ॥

२

अपास्ताशेषदोषाणां, वस्तुतत्त्वावलोकिनाम् ।
गुणेषु पक्षपातो यः स प्रमोदः प्रकीर्तितः ॥

३

दीनेष्वार्त्तेषु भीतेषु, याचमानेषु जीवितम् ।
प्रतीकारपरा बुद्धिः, कारुण्यमभिधीयते ॥

४

क्रूरकर्मसु निःशंकं, देवतागुरुनिन्दिषु ।
आत्मशंसिषु योपेक्षा, तन्माध्यस्थ्यमुदीरितम् ॥

५

नन्दंति मन्दाः श्रियमाप्य नित्यं,
परं विषीदन्ति विपद्गृहीताः ।
विवेकदृष्ट्या चरतां जनानां,
श्रियो न किञ्चिद् विपदो न किञ्चित् ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

६

प्राप्तव्यमर्थं लभते मनुष्यो,
दैवोऽपि तं लङ्घयितुं न शक्तः ।
तस्माद् न शोचामि न विस्मयो मे,
यदस्मदीयं न हि तत् परेषाम् ॥

७

जीवन्तु मे शत्रुगणाः सदैव,
येषां प्रसादेन विचक्षणोऽहम् ।
यदा यदा मां भजते प्रमाद–
स्तदा तदा ते प्रतिबोधयन्ति ॥

८

त्यक्तसंगो जीर्णवासा, मलक्लिन्नकलेवरः ।
भजन् माधुकरीं वृत्तिं, मुनिचर्यां कदा श्रये ॥

९

त्यजन् दुःशीलसंसर्गं, गुरुपादरजः स्पृशन् ।
कदाऽहं योगमभ्यस्यन्, प्रभवेयं भवच्छिदे ॥

१०

विराधितैः संयमसर्वयोगैः,
पतिष्यतस्ते भवदुःखराशौ ।
शास्त्राणि शिष्योपधिपुस्तकाद्या,
भक्ताश्च लोकाः शरणाय नालम् ॥

११

अधीत्य चतुरो वेदान्व्याकृत्याष्टादशस्मृतीः ।
अहो ! श्रमस्य वैफल्यमात्मापि कलितो न चेत् ॥

१२

गते शोको न कर्तव्यो, भविष्यं नैव चिन्तयेत् ।
वर्त्तमानेषु कार्येषु, वर्तयन्ति विचक्षणाः ॥

१३

सत्त्वेषु मैत्रीं गुणिषु प्रमोदं, क्लिष्टेषु जीवेषु कृपापरत्वम् ।
माध्यस्थभावं विपरीतवृत्तौ, सदा ममात्मा विदधातु देव ॥

१४

धनं दत्तं वित्तं जिनवचनमभ्यस्तमखिलं ।
क्रियाकाण्डं चण्डं रचितमवनौ सुप्तमसकृत् ॥
तपस्तीव्रं तप्तं चरणमपि चीर्णं चिरतरम् ।
न चेच्चित्ते भावस्तुषवपनवत्सर्वमफलम् ॥

१५

तर्कविहीनो वैद्यो, लक्षणहीनश्च पण्डितो लोके ।
भावविहीनो धर्मो, नूनं हस्यन्ते त्रीण्यपि ॥

१६

स्तोकमप्यनुष्ठानं, भावविशुद्धं हन्ति कर्ममलम् ।
लघुरपि सहस्रकिरणस्तिमिरनितम्बं प्रणाशयति ॥

१७

न काष्ठे विद्यते देवो, न शिलायां न मृण्मये ।
भावेषु विद्यते देवस्तस्माद् भावो हि कारणम् ॥

१८

पुत्रमित्रकलत्रादि, वस्तूनि च धनानि च ।
सर्वथाऽन्यस्वभावानि भावय त्वं प्रतिक्षणम् ॥

१९

परहितचिन्ता मैत्री, परदुःखविनाशिनी तथा करुणा ।
परसुखतुष्टिर्मुदिता, परदोषोपेक्षणमुपेक्षा ॥

२०

एक एव पदार्थस्तु त्रिधा भवति वीक्षितः ।
कामिनी कुणपं मांसं, कामिभिर्योगिभिः श्वभिः ॥

२१

शत्रुर्दहति संयोगे, वियोगे मित्रमप्यहो ।
उभयोर्दुःखदायित्वात्, को भेदः शत्रुमित्रयोः ॥

२२

को देशः कानि मित्राणि, कः कालः कौ व्ययागमौ ।
कश्चाहं का च मे शक्तिरिति चिन्त्यं मुहुर्मुहुः ॥


२८

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

२३

शास्त्राभ्यासो जिनपदनतिः संगतिः सर्वदार्यैः ।
सद्वृत्तानां गुणगणकथा दोषवादे च मौनम् ॥
सर्वस्यापि प्रियहितवचो भावना चात्मतत्त्वे ।
सम्पद्यन्तां मम भवभवे यावदाप्तोऽपवर्गः ॥

२४

जन्मैव व्यर्थतां नीतं, भवभोगप्रलोभिना ।
काचमूल्येन विक्रीतो, हन्त चिन्तामणिर्मया ॥

२५

पुराणान्ते श्मशानान्ते, मैथुनान्ते च या मतिः ।
सा मतिः सर्वदा चेत्स्यात्को न मुच्येत बन्धनात् ॥

२६

यस्मिन् सर्वाणि भूतानि ह्यात्मैवाभूद्विजानतः ।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥

२७

एकाकी चिन्तयेन्नित्यं विविक्ते हितमात्मनः ।
एकाकी चिन्तमानो हि, परं श्रेयोऽधिगच्छति ॥

२८

क्वासं क्व च गमिष्यामि, कश्चाहं किमिहागतः ।
को बन्धुर्मम कस्याहमित्यात्मानं विचिन्तय ॥

२९

शिवमस्तु सर्वजगतः, परहितनिरता भवन्तु भूतगणाः ।
दोषाः प्रयान्तु नाशं, सर्वत्र सुखी भवतु लोकः ॥

३०

कस्त्वं कोऽहं कुत आयातः, का मे जननी को मे तातः ।
इति परिभावय सर्वमसारं, सर्वं त्यक्त्वा स्वप्नविचारम् ॥

३१

वस्त्रहीनमलंकारं, घृतहीनं च भोजनम् ।
स्वरहीनं च गान्धर्वं, भावहीनं च मैथुनम् ॥

३२

वलयावलिदृष्टान्ताज्जीवो बहुपरिग्रही ।
दुःखं वेदयते नूनं, वरमेकाकिता ततः ॥

३३

पृथ्वीचन्द्रनृपो मुनिः कुरगडुश्चेतातिपुत्रस्तथा ।
चक्री श्रीभरतेश्वरश्च कपिलः श्रीमारुदेवी तथा ॥
आषाढो गुणसागरो रुषभृदाचार्यस्य शिष्यो न वो ।
भावेनैव भवाब्धिपारमगमन्नेतेऽखिला मानवाः ॥

३४

दानशीलतपःसंपद्भावेन भजते फलम् ।
स्वादः प्रादुर्भवेद्भोज्ये किं नाम लवणं विना ? ॥

३५

दानमिज्या तपः शौचं, तीर्थं वेदा श्रुतं तथा ।
सर्वाण्येतानि तीर्थानि, यदि भावोऽस्ति निर्मलः ॥

३६

भव्यैश्च भावना भाव्या, भरतेश्वरवद्यथा ।
फलन्ति दानशीलाद्या, वृष्ट्या यथेह पादपाः ॥

३७

क्रियाशून्यस्य यो भावो, भावशून्या च या क्रिया ।
अनयोरन्तरं दृष्टं, भानुखद्योतयोरिव ॥

३८

षट्खंडराज्ये भरतो निमग्नस्तांबूलवक्त्रः सविभूषणश्च ।
आदर्शहर्म्ये जटिते सुरत्नैर्ज्ञानं स लेभे वरभावतोऽत्र ॥

३९

ज्वालाभिश्शलभा जलैर्जलचरास्तिर्यग्जटाभिर्वटाः ।
मुण्डैरेडककाः समस्तपशवो नग्नाः खरा भस्मभिः ॥
काष्ठाभिरसकला द्रुमाः शुकवराः पाठाद् बका ध्यानतो ।
नो शुध्यन्ति विशुद्धभावचपला नैते क्रियातत्पराः ॥

४०

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु, मा कश्चित्पापमाचरेत् ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



४१

अनित्याद्याः प्रशस्यन्ते द्वादशैता मुमुक्षुभिः ।
या मुक्तिसौधसोपानराजयोऽत्यन्तवन्धुराः ॥

४२

विध्याति कषायाग्निर्विगलति रागो विलीयते ध्वान्तम् ।
उन्मिषति बोधदीपो हृदि पुंसां भावनाभ्यासात् ॥

४३

समत्वं भज भूतेषु निर्ममत्वं विचिन्तय ।
अपाकृत्य मनःशल्यं भावशुद्धिं समाश्रय ॥

४४

चिनु चित्ते भृशं भव्य ! भावना भावशुद्धये ।
याः सिद्धान्तमहातन्त्रे देवदेवैः प्रतिष्ठिताः ॥

## ज्ञान ।

१

न ज्ञानतुल्यः किल कल्पवृक्षो,
न ज्ञानतुल्या किल कामधेनुः ।
न ज्ञानतुल्यः किल कामकुम्भो,
ज्ञानेन चिन्तामणिरप्यतुल्यः ॥

२

अक्रोधवैराग्यजितेन्द्रियत्वं,
क्षमा दया सर्वजनप्रियत्वम् ।
निर्लोभदानं भयशोकहानं,
ज्ञानस्य चिह्नं दशलक्षणं च ॥

३

अज्ञानं नरको घोर–स्तमोरूपतया मतं ।
अज्ञानमेव दारिद्र्य—मज्ञानं परमो रिपुः ॥

४

अज्ञानं रोगसंघातो, जरा ह्यज्ञानमुच्यते ।
अज्ञानं विपदः सर्वा, अज्ञानं मरणं मतम् ॥

५

कार्याकार्यं न जानन्ति, गम्यागम्यं च तत्त्वतः ।
भक्ष्याभक्ष्यं न बुध्यन्ते, पेयापेयं च सर्वथा ॥

६

रत्नत्रयीं रक्षति येन जीवो,
विरज्यतेऽत्यन्तशरीरसौख्यात् ।
रुणद्धि पापं कुरुते विशुद्धिं,
ज्ञानं तदिष्टं सकलार्थविद्भिः ॥

७

यदज्ञजीवो विधुनोति कर्म,
तपोभिरुग्रैर्भवकोटिलक्षैः ।
ज्ञानी तु चैकक्षणतो हिनस्ति,
तदत्र कर्मेति जिना वदन्ति ॥

८

न देवं नादेवं न शुभगुरुमेवं न कुगुरुं,
न धर्मं नाधर्मं न गुणपरिणद्धं न विगुणम् ।
न कृत्यं नाकृत्यं न हितमहितं नापि निपुणं,
विलोकन्ते लोका जिनवचनचक्षुर्विरहिताः ॥

९

संसारसागरं घोरं, तर्तुमिच्छति यो नरः ।
ज्ञाननावम् समासाद्य, पारं याति सुखेन सः ॥

१०

किं गर्जितेन वृषभेण पराजितेन,
किं कोकिलस्वरकृतेन विना वसन्तम् ।
किं कातरेण बहुशास्त्रपरिग्रहेण,
किं जीवितेन पुरुषेण निरक्षरेण ॥

११

यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन ! ।
ज्ञानाग्निः सर्वकर्माणि, भस्मसात्कुरुते तथा ॥



For Private And Personal Use Only

१२

चर्मचक्षुर्भृतः सर्वे, देवाश्चावधिचक्षुषः ।
सर्वचक्षुर्धराः सिद्धा, साधवः शास्त्रचक्षुषः ॥

१३

ये द्वेषरागाश्रयलोभमोहप्रमादनिद्रामदखेदहीनाः ।
विज्ञातनिःशेषपदार्थतत्त्वास्तेषां प्रमाणं वचनं विधेयम्

१४

तमो धुनीते कुरुते प्रकाशं, शमं विधत्ते विनिहन्ति कोपम्
तनोति धर्मं विधुनोति पापं, ज्ञानं न किं किं कुरुते नराणाम्

१५

पूर्वापरविरोधेन वर्जितं यच्च निर्मलं ।
तदेव भुवने ज्ञानं, भव्यानां लोचनं परं ॥

१६

जीवानां सुदया यत्र, स्थाप्यते शर्मकारिणी ।
तज्ज्ञानं सुबुधैः प्रोक्तं, सर्वसंपद्विधायकम् ॥

१७

सज्ज्ञानं जिनभाषितं शुभतरं कुज्ञानविध्वंसनं ।
लोकालोकविलोकनैकनयनं संदेहनिर्णाशनम् ॥
जीवाजीववसुतत्त्वभेदकथकं सज्ञानिसंजीवनम् ।
सर्वप्राणिसुखं प्रमोदजनकं कुर्यात्सतां मङ्गलम् ॥

१८

किं क्लिष्टेन्द्रियरोधेन, किं सदा पठनादिभिः ।
किं सर्वस्वप्रदानेन, तत्त्वं नोन्मीलितं यदि ॥

१९

ज्ञानाजीर्णमृताः केचिज्ज्ञानदन्धास्तथाऽपरे ।
अन्ये तु ज्ञानबाहीकाः केचिज्ज्ञानमयाः पुनः ॥

१८

ज्ञानं नाम महारत्नं, यन्न प्राप्तं कदाचन ।
संसारे भ्रमता भीमे, नानादुःखविधायिनि ॥

१९

सन्तु शास्त्राणि सर्वाणि, सरहस्यानि दूरतः ।
एकमप्यक्षरं सम्यक्, शिक्षितं निष्फलं न हि ॥

२०

भुवने हि परं ज्ञानं, ज्ञानं सर्वार्थसाधकम् ।
अनिष्टवस्तुविस्तारवारकं ज्ञानमीरितम् ॥

२१

सामायिकविशुद्धात्मा, सर्वथा घातिकर्मणः ।
क्षयात्केवलमाप्नोति, लोकालोकप्रकाशकम् ॥

२२

सर्वं द्वन्द्वं परित्यज्य, निभृतेनान्तरात्मना ।
ज्ञानामृतं सदा पेयं, चित्ताह्लादनमुत्तमम् ॥

२३

बीजानि वह्निदग्धानि, न रोहन्ति यथा पुनः ।
ज्ञानदग्धैस्तथा क्लेशैर्नात्मा सम्बध्यते तथा ॥

२४

ज्ञानाद्विदन्ति खलु, कृत्यमकृत्यजातं,
ज्ञानाच्चरित्रममलं च समाचरन्ति ।
ज्ञानाच्च भव्यभविनः शिवमाप्नुवन्ति,
ज्ञानं हि मूलमतुलं सकलश्रियां तत् ॥

२५

यथा यथा ज्ञानबलेन जीवो,
जानाति तत्त्वं जिननाथदृष्टम् ।
तथा तथा धर्ममतिः प्रशस्ता,
प्रजायते पापविनाशशक्ता ॥

२६

क्षेत्रे प्रकाशं नियतं करोति,
रविर्दिनेऽस्तं पुनरेति रात्रौ ।
ज्ञानं त्रिलोके सकले प्रकाशं,
करोति नाच्छादनमस्ति किञ्चित् ॥

२७

पूज्यं स्वदेशे भवतीह राज्यं,
ज्ञानं त्रिलोकेऽपि सदार्चनीयम् ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ज्ञानं विवेकाय मदाय राज्यं,
ततो न ते तुल्यगुणे भवेताम् ॥

२८

जानन्ति केचिन्न तु कर्तुमीशाः
कर्तुं क्षमा ये न च ते विदन्ति ।
जानन्ति तत्त्वं प्रभवन्ति कर्तुं
ते केऽपि लोके विरला भवन्ति ॥

२९

मोहान्धकारे भ्रमतीह तावत्
संसारदुःखैश्च कदर्थ्यमानः ।
यावद्विवेकार्कमहोदयेन
यथास्थितं पश्यति नात्मरूपम् ॥

३०

ज्ञानं स्यात् कुमतान्धकारतरणिर्ज्ञानं जगल्लोचनं ।
ज्ञानं नीतितरङ्गिणीकुलगिरिर्ज्ञानं कषायापहम् ॥
ज्ञानं निर्वृतिवश्यमन्त्रममलं ज्ञानं मनःपावनं ।
ज्ञानं स्वर्गगतिप्रयाणपटहं ज्ञानं निदानं श्रियः ॥

३१

३२ अज्ञानतमसाच्छन्नो, मूढान्तःकरणो नरः ।
न जानाति कुतः कोऽहं क्वाहं गन्ता किमात्मकः ॥

३२

अज्ञानी क्षपयेत् कर्म, यज्जन्मशतकोटिभिः ।
तज्ज्ञानी तु त्रिगुप्तात्मा, निहन्त्यन्तर्मुहूर्तके ॥

३३

जन्मजरामरणभयैरभिद्रुते व्याधिवेदनाग्रस्ते ।
जिनवरवचनादन्यन्नास्ति शरणं क्वचिल्लोके ॥

## दर्शन ।

१

श्लाघ्यं हि चरणज्ञानवियुक्तमपि दर्शनम् ।
न पुनर्ज्ञानचारित्रे, मिथ्यात्वविषदूषिते ॥

२

सम्यक्शास्त्रपरिज्ञाना-द्विरक्ता भवतो जनाः ।
लब्ध्वा दर्शनसंशुद्धिं, ते यान्ति परमां गतिम् ॥

३

ध्यानं दुःखनिधानमेव, तपसः संतापमात्रं फलं ।
स्वाध्यायोऽपि हि बंध एव कुधियां तेऽभिग्रहाः कुग्रहाः ॥
अश्लाघ्या खलु दानशीलतुलनातीर्थादियात्रा वृथा ।
सम्यक्त्वेन विहीनमन्यदपि यत्तत्सर्वमंतर्गडुः ॥

४

सम्यक्त्वसहिता एव, शुद्धा दानादिकाः क्रियाः ।
तासां मोक्षफलं प्रोक्तं, यदस्य सहचारिता ॥

५

पिधानं दुर्गतिद्वारे, निधानं सर्वसम्पदः ।
विधानं मोक्षसौख्यानां, पुण्यैः सम्यक्त्वमाप्नुयात् ॥

६

सम्यक्त्वरत्नान्न परं हि रत्नं
सम्यक्त्वमित्रान्न परं हि मित्रम् ।
सम्यक्त्वबन्धोर्न परो हि बन्धुः
सम्यक्त्वलाभान्न परो हि लाभः ॥

७

अन्तर्मुहूर्त्तमपि यः समुपास्य जन्तुः
सम्यक्त्वरत्नममलं विजहाति सद्यः ।
बम्भ्रम्यते भवपथे सुचिरं न कोऽपि
तद् बिभ्रतश्चिरतरं किमुदीरयामः ॥

८

भाषाबुद्धिविवेकवाक्यकुशलः शङ्कादिदोषोज्झितः ।
गम्भीरः प्रशमश्रिया परिगतो वश्येन्द्रियो धैर्यवान् ॥
प्रावीण्यं हृदि निश्चयेन सहितो भक्तिश्च देवे गुरौ । ३२
कारुण्यादिगुणैरलंकृततनुः सम्यक्त्वयोग्यो भवेत् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



९

श्रद्धया साध्यते धर्मो, महद्भिर्नार्थराशिभिः ।
अकिञ्चना हि मुनयः श्रद्धावन्तो दिवं गताः ॥

१०

श्रद्धावांल्लभते ज्ञानं, तत्परः संयतेन्द्रियः ।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ॥

११

अश्रद्धा परमं पापं श्रद्धा पापप्रमोचिनी ।
जहाति पापं श्रद्धावान्, सर्पो जीर्णामिव त्वचम् ॥

१२

नलिन्यां च यथा नीरं, भिन्नन्तिष्ठति सर्वदा ।
अयमात्मा स्वभावेन, देहे तिष्ठति निर्मलः ॥

१३

शङ्का कांक्षा निन्दा, परशंसा संस्तवोऽभिलापश्च ।
परिहर्तव्याः सद्भिः, सम्यक्त्वविशोधिभिः सततम् ॥

१४

नरत्वेपि पशूयन्ते, मिथ्यात्वग्रस्तचेतसः ।
पशुत्वेऽपि नरायन्ते, सम्यक्त्वव्यक्तचेतनाः ॥

१५

अप्राप्ते बोधिरत्ने हि, चक्रवर्त्यपि रङ्कवत् ।
संप्राप्ते बोधिरत्ने तु, रङ्कोपि स्यात्ततोऽधिकः ॥

१६

या देवे देवताबुद्धि-र्गुरौ च गुरुतामतिः ।
धर्मे च धर्मधीः शुद्धा, सम्यक्त्वमिदमुच्यते ॥

१७

नरत्वं दुर्लभं लोके, विद्या तत्र सुदुर्लभा ।
धर्मित्वं दुर्लभं तत्र श्रद्धा तत्र सुदुर्लभा ॥

१८

सम्यग्दर्शनसंपन्नः, कर्मणा न हि बध्यते ।
दर्शनेन विहीनस्तु, संसारं प्रतिपद्यते ॥

१९

विनैककं शून्यगणा वृथा यथा
विनार्कतेजो नयने वृथा यथा ।
विना सुवृष्टिं च कृषिर्वृथा यथा
विना सुदृष्टिं विपुलं तपस्तथा ॥

२०

न तद्धनं येन न जायते सुखं
न तत्सुखं येन न तोषसम्भवः ।
न तोषणं तन्न यतो व्रतादरो
व्रतं न सम्यक्त्वयुतं भवेन्न चेत् ॥

२१

चिरं गतस्य संसारे, बहुयोनिसमाकुले ।
प्राप्ता सुदुर्लभा बोधिः, शासने जिनभाषिते ॥

२२

सुरेन्द्रनागेन्द्रनरेन्द्रसंपदः, सुखेन सर्वा लभते भ्रमन् भवे
अशेषदुःखक्षयकारणं परं, न दर्शनं पावनमश्नुते जनः

२३

मूलं बोधिद्रुमस्यैतद्, द्वारं पुण्यपुरस्य च ।
पीठं निर्वाणहर्म्यस्य, निधानं सर्वसंपदाम् ॥

२४

मूलं धर्मस्य सम्यक्त्वं, स्वर्गसौख्यफलप्रदम् ।
अनुक्रमेण मोक्षस्य, सुखदं भणितं ध्रुवम् ॥

२५

कनीनिकेव नेत्रस्य, कुसुमस्येव सौरभम् ।
सम्यक्त्वमुच्यते सारं, सर्वेषां धर्मकर्मणाम् ॥

२६

वरं नरकवासोऽपि, सम्यक्त्वेन समायुतः ।
न तु सम्यक्त्वहीनस्य, निवासो दिवि राजते ॥

२७

शमसंवेगनिर्वेदानुकम्पास्तिक्यलक्षणैः ।
लक्षणैः पञ्चभिः सम्यक् सम्यक्त्वमुपलक्ष्यते ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

२८

पण्डितोऽसौ विनीतोऽसौ, धर्मज्ञः प्रियदर्शनः ।
यः सदाचारसम्पन्नः, सम्यक्त्वदृढमानसः ॥

२९

सम्यक्त्वेन हि युक्तस्य, ध्रुवं निर्वाणसंगमः ।
मिथ्यादृशोऽस्य जीवस्य, संसारे भ्रमणं सदा ॥

३०

सम्यक्त्वं परमं रत्नं, शङ्कादिमलवर्जितम् ।
संसारदुःखदारिद्र्यं, नाशयेत् सुविनिश्चितम् ॥

३१

धनेन हीनोऽपि धनी मनुष्यो,
यस्यास्ति सम्यक्त्वधनं प्रधानम् ।
धनं भवेदेकभवे सुखाय,
भवे भवेऽनन्तसुखी सुदृष्टिः ॥

## दश प्रकार सम्यक्त्व की रुचि ।

### १ निसर्ग सम्यक्त्व ।

३२


द्रव्यक्षेत्रादिभावा ये, जिनैः ख्यातास्तथैव च ।
श्रद्धत्ते स्वयमेवैतान्, स निसर्गरुचिः स्मृतः ॥

### २ उपदेश सम्यक्त्व ।

३३

यः परेणोपदिष्टस्तु, छद्मस्थेन जिनेन वा ।
तानेव मन्यते भावानुपदेशरुचिः स्मृतः ॥

### ३ आज्ञा सम्यक्त्व ।

३४

रागो द्वेषश्च मोहश्च, यस्याज्ञानं क्षयं गतम् ।
जिनाज्ञायां रुचिं कुर्वन्निहाज्ञारुचिरिष्यते ॥

### ४ सूत्ररुचि सम्यक्त्व ।

३५

श्रीसर्वज्ञागमो येन, दृष्टः स्पष्टार्थतोऽखिलः ।
आगमज्ञैरभिगमरुचिरेषोऽभिधीयते ॥

### ५ बीजरुचि सम्यक्त्व ।

३६

स बीजरुचिरासाद्य, पदमेकमनेकधा ।
योऽध्यापयति सम्यक्त्वं, तैलबिन्दुरिवोदके ॥

### ६ अधिगमरुचि सम्यक्त्व ।

३७

गुरूपदेशमालम्ब्य, प्रादुर्भवति देहिनाम् ।
यत्तु सम्यक्श्रद्धानं, तत् स्यादधिगमजं परम् ॥

### ७ विस्ताररुचि सम्यक्त्व ।

३८

द्रव्याणां निखिला भावाः, प्रमाणैरखिलैर्नयैः ।
उपलम्भगता यस्य, स विस्ताररुचिर्मतः ॥

### ८ क्रियारुचि सम्यक्त्व ।

३९

ज्ञानदर्शनचारित्रतपःसमितिगुप्तिषु ।
यः क्रियासु रतो नित्यं, स विज्ञेयः क्रियारुचिः ॥

### ९ संक्षेपरुचि सम्यक्त्व ।

४०

आज्ञाप्रवचने जैने, कुदृष्टावनभिग्रहः ।
यः स्याद् भद्रभावेन, तं संक्षेपरुचिं विदुः ॥

### १० धर्मरुचि सम्यक्त्व ।

४१

यो धर्मं श्रुतचारित्रास्तिकायविषयं खलु ।
श्रद्दधाति जिनाख्यातं, स धर्मरुचिरिष्यते ॥

## चारित्र ।

१

३४
चारित्रेण विहीनः, श्रुतवानपि नोपजीव्यते सद्भिः ।
शीतलजलपरिपूर्णः, कुलजैश्चाण्डाल कूप इव ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



२

सद्दर्शनज्ञानबलेन भूता, ।
पापक्रियाया विरतिस्त्रिधा या ॥
जिनेश्वरैस्तद् गदितं चरित्रं ।
समस्तकर्मक्षयहेतुभूतम् ॥

३

विनौषधं शाम्यति नो गदो यथा ।
विनाऽशनं शाम्यति नो क्षुधा यथा ॥
विनाम्बुपानेन तृषाव्यथा यथा ।
विना व्रतं कर्मरुगास्रवस्तथा ॥

४

सत्यं तपो ज्ञानमहिंसता च ।
विद्वत्प्रणामं च सुशीलता च ॥
एतानि यो धारयते स विद्वान् ।
न केवलं यः पठते स विद्वान् ॥

५

त्वरितं किं कर्त्तव्यं ?, विदुषा संसारसन्ततिच्छेदः ।
किं मोक्षतरोर्बीजं ? सम्यज्ज्ञानं क्रियासहितम् ॥

६

शास्त्राण्यधीत्यापि भवन्ति मूर्खा–
यस्तु क्रियावान्पुरुषः स विद्वान् ।
सुचिन्तितं चौषधमातुराणां,
न नाममात्रेण करोत्यरोगम् ॥

७

आचाराल्लभते ह्यायुराचारादीप्सिताः प्रजाः ।
आचाराद्धनमक्षय्यमाचारो हन्त्यलक्षणम् ॥

८

आचारप्रभवो धर्मो, नृणां श्रेयस्करो महान् ।
इह लोके परा कीर्तिः, परत्र परमं सुखम् ॥

९

सर्वागमानामाचारः, प्रथमं परिकल्पते ।
आचारप्रभवो धर्मो, धर्मस्य प्रभुरच्युतः ॥

१०

आचारः परमो धर्म आचारः परमं तपः ।
आचारः परमं ज्ञानमाचारात्किं न साध्यते ॥

११

गर्भे विलीनं वरमत्र मातुः,प्रसूतिकालेऽपि वरं विनाशः ।
असंभवो वा वरमंगभाजो, न जीवितं चारुचरित्रमुक्तं ॥

१२

वेषधारणं सिद्धेः, कारणं न च तत्कथा ।
क्रियैव कारणं सिद्धेः, सत्यमेतन्न संशयः ॥

१३

इच्छां विना यत्किल शीलपालन–
मज्ञानकष्टं नरके च ताडनम् ।
तिर्यक्षु तृड्क्षुद्वधबन्धवेदन–
मेतैरकामा भवतीह निर्जरा ॥

१४

क्रियाविरहितं हन्त !, ज्ञानमात्रमनर्थकम् ।
गतिं विना पथज्ञोऽपि, नाप्नोति पुरमीप्सितम् ॥

१५

ईर्याभाषैषणाऽऽदाननिक्षेपोत्सर्गसंज्ञिकाः ।
पञ्चाहुः समितीस्तिस्रो गुप्तीस्त्रियोगनिग्रहात् ॥

१६

नोर्ध्वं न तिर्यग् दूरं वा, निरीक्षन् पर्यटेद् बुधः ।
युगमात्रं महीपृष्ठं नरो, गच्छेद्विलोकयन् ॥

१७

आत्मप्रशंसापरदोषहास्यपैशुन्य–
कार्कश्यविरुद्धवाक्यम् ।
विवर्ज्य भाषां वदतां मुनीनां,
वदन्ति भाषासमितिं जिनेन्द्राः ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



१८

द्विचत्वारिंशतभिक्षादोषैर्नित्यमदूषितम्।
मुनिर्यदन्नमादत्ते, सैषणासमितिर्मता॥

१९

आसनादीनि संवीक्ष्य, प्रतिलिख्य च यत्नतः।
गृह्णीयान्निक्षिपेद्वा यत्, साऽऽदानसमितिः स्मृता॥

२०

कफमूत्रमलप्रायं, निर्जन्तुजगतीतले।
यत्नाद्यदुत्सृजेत्साधुः, सोत्सर्गसमितिर्भवेत्॥

२१

विमुक्तकल्पनाजालं, समत्वे सुप्रतिष्ठितम्।
आत्मारामं मनस्तज्ज्ञैर्मनोगुप्तिरुदाहृता॥

२२

संज्ञादिपरिहारेण, यन्मौनस्यावलम्बनम्।
वाग्वृत्तेः संवृत्तिर्वा या, सा वाग्गुप्तिरिहोच्यते॥

२३

उपसर्गप्रसङ्गेऽपि, कायोत्सर्गजुषो मुनेः।
स्थिरीभावः शरीरस्य, कायगुप्तिर्निगद्यते॥

२४

कफविप्रुण्मलामर्शसर्वौषधिमहर्द्धयः।
संभिन्नश्रोतोलब्धिश्च, यौगं ताण्डवडम्बरम्॥

२५

ब्रह्मस्त्रीभ्रूणगोघातपातकान्नरकातिथेः।
दृढप्रहारिप्रभृतेर्योगो, हस्तावलम्बनम्॥

२६

उपदेष्टुं च वक्तुं च, जनः सर्वोऽपि पंडितः।
तदनुष्ठानकर्तृत्वे, मुनयोऽपि न पंडिताः॥

२७

पठकः पाठकश्चैव, ये चान्ये शास्त्रचिंतकाः।
सर्वे व्यसनिनो ज्ञेया यः क्रियावान् स पंडितः॥

२८

सामायिकमित्याद्यं छेदोपस्थापनं द्वितीयं तु।
परिहारविशुद्धिकं सूक्ष्मसम्परायं यथाख्यातम्॥

२९

पञ्चास्रवाद्विरमणं पञ्चेन्द्रियनिग्रहः कषायजयः।
दण्डत्रयविरतिश्चेति संयमः सप्तदशभेदः॥

३०

चारित्ररत्नान्न परं हि रत्नं, चारित्रवित्तान्न परं हि वित्तम्।
चारित्रलाभान्न परो हि लाभश्चारित्रयोगान्न परो हि योगः

३१

क्षितितलशयनं वा प्रान्तभैक्षाशनं वा।
सहजपरिभवो वा नीचदुर्भाषितं वा॥
महति फलविशेषे, नित्यमभ्युद्यतानां।
न मनसि न शरीरे दुःखमुत्पादयन्ति॥

३२

दीक्षा गृहीता दिनमेकमेव, येनोग्रचित्तेन शिवं स याति।
न तत् कदाचित् तदवश्यमेव वैमानिकः स्यात् त्रिदशप्रधानः

## मुक्ति।

१

मुक्तिमिच्छसि चेत्तात, विषयान्विषवत्त्यज।
क्षमाऽऽर्जवदयाशौचं, सत्यं पीयूषवत्पिब॥

२

यस्मान्मोक्षसुखादन्यत्सुखं क्वापि न विद्यते।
तस्मान्मुमुक्षुणा भाव्यं, नैव भोगेच्छुना क्वचित्॥

३

अभावाद्बन्धहेतूनां, बंधनिर्जरया तथा।
कृत्स्नकर्मप्रमोक्षो हि, मोक्ष इत्यभिधीयते॥

४

दग्धे बीजे यथाऽत्यन्तं, प्रादुर्भवति नाङ्कुरः।
कर्मबीजे तथा दग्धे, न रोहति भवाङ्कुरः॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

५

संसारविषयातीतं, सिद्धानामव्ययं सुखम् ।
अव्याबाधमिति प्रोक्तं, परमं परमर्षिभिः ॥

६

ज्ञानावरणहानान्ते, केवलज्ञानशालिनः ।
दर्शनावरणच्छेदादुद्यत्केवलदर्शनः ॥

७

वेदनीयसमुच्छेदादव्याबाधत्वमाश्रिताः ।
मोहनीयसमुच्छेदात्सम्यक्त्वमचलं श्रिताः ॥

८

आयुःकर्मसमुच्छेदादवगाहनशालिनः ।
नामकर्मसमुच्छेदात्परमं सौक्ष्म्यमाश्रिताः ॥

९

गोत्रकर्मसमुच्छेदात्सदाऽगौरवलाघवाः ।
अन्तरायसमुच्छेदादनन्तं वीर्यमाश्रिताः ॥

१०

यस्य चित्तं निर्विषयं, हृदयं यस्य शीतलम् ।
तस्य मित्रं जगत्सर्वं, तस्य मुक्तिः करस्थिता ॥

११

मोक्षस्य काङ्क्षा यदि वै तवास्ति,
त्यजातिदूराद्विषयान् विषं यथा ।
पीयूषवत्तोषदयाक्षमार्जव—
प्रशान्तिदान्तीर्भज नित्यमादरात् ॥

१२

मोक्षस्य हेतुः प्रथमो निगद्यते,
वैराग्यमत्यन्तमनित्यवस्तुषु ।
ततः शमश्चापि दमस्तितिक्षा,
न्यासः प्रसक्ताखिलकर्मणां भृशम् ॥

१३

धर्माधर्मौ सुखं दुःखं, मानसानि न ते विभो ।
न कर्त्तासि न भोक्तासि, मुक्त एवासि सर्वदा ॥

१४

लयविक्षेपरहितं मनः कृत्वा सुनिश्चलम् ।
एतज्ज्ञानं च मोक्षं च, शेषास्तु ग्रन्थविस्तराः ॥

१५

वदन्तु शास्त्राणि यजन्तु देवान्,
कुर्वन्तु कर्माणि भजन्तु देवताः ।
आत्मैक्यबोधेन विनापि मुक्तिर्न—
सिद्ध्यति वर्षशतान्तरेऽपि ॥

१६

नाशाम्बरत्वे न सिताम्बरत्वे,
न तर्कशास्त्रे न च तत्त्ववादे ।
न पक्षसेवाश्रयणेन मुक्तिः,
कषायमुक्तिः किल मुक्तिरेव ॥

१७

सुरासुरनरेन्द्राणां, यत्सुखं भुवनत्रये ।
तत्स्यादनन्तभागोऽपि, न मोक्षसुखसम्पदाम् ॥

१८

संसारे निवसन् स्वार्थ—सज्जः कज्जलवेश्मनि ।
लिप्यते निखिलो लोको, ज्ञानसिद्धो न लिप्यते ॥

१९

न निन्दति न च स्तौति, न हृष्यति न कुप्यति ।
न ददाति न गृह्णाति, मुक्तः सर्वत्र नीरसः ॥

२०

मोक्षस्य न हि वासोऽस्ति, न ग्रामान्तरमेव वा ।
अज्ञानहृदयग्रन्थि—नाशो मोक्ष इति स्मृतः ॥

२१

कामानां हृदये वासः, संसार इति कीर्तितः ।
तेषां सर्वात्मना नाशो, मोक्ष उक्तो मनीषिभिः ॥

२२

निर्लेपो निष्कलः शुद्धो, निष्पन्नोऽत्यन्तनिर्वृतः ।
निर्विकल्पश्च शुद्धात्मा, परमात्मेति वर्णितः ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

२३

निर्ममत्वं परं तत्त्वं, निर्ममत्वं परं सुखम् ।
निर्ममत्वं परं बीजं, मोक्षस्य कथितं बुधैः ॥

२४

जन्तूनामवनं जिनेशमहनं भक्त्याऽऽगमाकर्णनं ।
साधूनां नमनं मदापनयनं सम्यग् गुरोर्माननम् ॥
मायाया हननं च क्रोधशमनं लोभद्रुमोन्मूलनं ।
चेतःशोधनमिन्द्रियस्य दमनमेतच्छिवोपायनम् ॥

२५

देवो दलितरागारिः, गुरुस्त्यक्तपरिग्रहः ।
धर्मः प्रगुणकारुण्यो, मुक्तिमूलमिदं मतम् ॥

२६

सर्वसङ्गपरित्यागः, सर्वद्वन्द्वसहिष्णुता ।
सर्वद्वन्द्वसमत्वं च, मोक्षस्य विधिरुत्तमः ॥

२७

गतपङ्कं यथा तुम्बं, जले यात्युपरि स्वयम् ।
क्षीणकर्ममलो जीवस्तथा याति शिवालयम् ॥

२८

निर्ममत्वं विरागाय, वैराग्याद्योगसङ्गतिः ।
योगात्सञ्जायते ज्ञानं, ज्ञानान्मुक्तिः प्रजायते ॥

२९

शीतोष्णादिभिरत्युग्रैर्यस्य बाधा न विद्यते ।
न भीतिमेति चान्येभ्यस्तस्य सिद्धिरुपस्थिता ॥

३०

न ज्ञानं केवलं मुक्त्यै, न क्रिया केवला भवेत् ।
संयोगादुभयोः सम्यग्, मुक्तिमाहुर्मनीषिणः ॥

३१

केवलं केवलज्ञानं, प्राप्नुवन्ति स्ववीर्यतः ।
स्ववीर्येणैव गच्छन्ति, जिनेन्द्राः परमं पदम् ॥

३२

स्वर्गापवर्गौ भवतो विभिन्नौ,
स्वर्गाद् यतः स्यात् पतनं न मोक्षात् ।
स्वर्गे सुखश्रीः पुनरिन्द्रियोत्था,
ज्ञेया परब्रह्ममयी तु मोक्षे ॥

३३

कृत्स्नकर्मक्षयान्मोक्षो, जन्ममृत्य्वादिवर्जितः ।
सर्वबाधाविनिर्मुक्त एकान्तसुखसङ्गतः ॥

## मिथ्यात्व स्वरूप।

१

मिथ्यात्वं परमो रोगो, मिथ्यात्वं परमं तमः ।
मिथ्यात्वं परमः शत्रु-मिथ्यात्वं परमं विषम् ॥

२

जन्मन्येकत्र दुःखाय, रोगो ध्वान्तं रिपुर्विषम् ।
अपि जन्मसहस्रेषु, मिथ्यात्वमचिकित्सितम् ॥

३

अदेवे देवबुद्धिर्या, गुरुधीरगुरौ च या ।
अधर्मे धर्मबुद्धिश्च, मिथ्यात्वं तद्विपर्ययात् ॥

४

अदेवे देव सङ्कल्प—मधर्मे धर्ममानिताम् ।
अतत्त्वे तत्त्वबुद्धिं च, विधत्ते सुपरिस्फुटम् ॥

५

अपात्रे पात्रतारोप—मगुणेषु गुणग्रहम् ।
संसारहेतौ निर्वाण—हेतुभावं करोत्ययम् ॥

६

मिथ्यात्वपङ्कमलिनो, जीवो विपरीतदर्शनो भवति ।
श्रद्धत्ते न च धर्मं मधुरमपि रसं यथा ज्वरितः ॥

७

पटोत्पत्तिमूलं यथा तन्तुवृन्दं ।
घटोत्पत्तिमूलं यथा मृत्समूहः ॥
तृणोत्पत्तिमूलं यथा तस्य बीजं ।
तथा कर्ममूलं च मिथ्यात्वमुक्तम् ॥



For Private And Personal Use Only

८

शस्यानि वोषरे क्षेत्रे, निक्षिप्तानि कदाचन ।
न व्रतानि प्ररोहंति, जीवे मिथ्यात्ववासिते ॥

९

भुजङ्गविषशस्त्राग्निर्व्याघ्रसिंहः शरीरिणाम् ।
विनाशयति जन्मैकं, मिथ्यात्वं कोटिशो भवान् ॥

१०

नास्ति नित्यो न कर्ता च, भोक्तात्मा न निर्वृतः ।
तदुपायश्च नेत्याहुर्मिथ्यात्वस्य पदानि षट् ॥

११

करोति दोषं न तमत्र केसरी ।
न दंदशूको न करी न भूमिपः ॥
अतीव रुष्टो न च शत्रुरुद्धतो ।
यमत्र मिथ्यात्वरिपुः शरीरिणाम् ॥

१२

यथाऽन्धकारान्धपटावृतो जनो ।
विचित्रचित्रं न विलोकितुं क्षमः ॥
यथोक्ततत्त्वं जिननाथभाषितं ।
निसर्गमिथ्यात्वतिरस्कृतस्तथा ॥



१३

दुर्वचनं पराधीनं, शरीरे कष्टकारकम् ।
शल्यं शल्यतरं तस्मात्, मिथ्यात्वं शल्यमात्मनि ॥

१४

शत्रुभिर्निहितं शस्त्रं, शरीरे जनयति नृणाम् ।
यथा व्यथा करोत्येव, तथा मिथ्यात्वमात्मनः ॥

१५

मिथ्यात्वशल्यमुन्मूल्य, स्वात्मानं निर्मलीकुरु ।
यथाऽजस्रं सुसिंदूररजसा भुवि दर्पणः ॥

१६

स्वाध्यायेन गुरोर्भक्त्या, दीक्षया तपसा तथा ।
येन केनोद्यमेनैव, मिथ्यात्वशल्यमुद्धरेत् ॥

१७

मिथ्यात्वमविरतिश्च, कषाया दुःखदायिनः ।
प्रमादा दुष्टयोगाश्च, पञ्चैते बन्धकारणम् ॥

## अहिंसा ।

१

अमध्यमध्ये कीटस्य, सुरेन्द्रस्य सुरालये ।
समाना जीविताकांक्षा, समं मृत्युभयं द्वयोः ॥

२

वैरिणोपि हि मुच्यन्ते, प्राणान्ते तृणभक्षणात् ।
तृणाहारा सदैवैते, हन्यन्ते पशवः कथम् ? ॥

३

पंचेन्द्रियाणि त्रिविधं बलं च,
उच्छ्वासनिःश्वासमथान्यदायुः ।
प्राणा दशैते भगवद्भिरुक्तास्तेषां—
वियोजीकरणं तु हिंसा ॥

४

यूपं छित्वा पशून्हत्वा, कृत्वा रुधिरकर्दमम् ।
यद्येवं गम्यते स्वर्गे नरके केन गम्यते ॥

५

'धनं फलति दानेन जीवितं जीवरक्षणात् ।
रूपमारोग्यमैश्वर्यं—महिंसा फलमश्नुते' ॥

६

अनुमन्ता विशसिता, निहन्ता क्रयविक्रयी ।
संस्कर्ता चोपहर्ता च, खादकश्चेति घातकाः ॥

७

यो न हि कुरुते पापं, सर्वभूतेषु कर्हिचित् ।
कर्मणा मनसा वाचा, स ज्ञानी कथ्यते बुधैः ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

८

इन्द्रियाणि पशून् कृत्वा, वेदीं कृत्वा तपोमयीम् ।
अहिंसा आहुतीर्दद्यादेष यज्ञः सनातनः ॥

९

जले जन्तुः स्थले जन्तुराकाशे जन्तुरेव च ।
जन्तुमालाकुले लोके कथं भिक्षुरहिंसकः ॥

१०

सूक्ष्मा न प्रतिपीड्यन्ते, प्राणिनः स्थूलमूर्तयः ।
ये शक्यास्ते विवर्ज्यन्ते, का हिंसा संयमात्मनः ? ॥

११

दुःखोत्पत्तिर्मनःक्लेशः, तत्पर्यायस्य च क्षयः ।
यस्याः स्यात् सा प्रयत्नेन, हिंसा हेया विपश्चिता ॥

१२

प्राणी प्रमादतः कुर्यात्, यत्प्राणव्यपरोपणम् ।
सा हिंसा जगदे प्राज्ञैर्बीजं संसारभूरुहः ॥

१३

नित्यानित्ये ततो जीवे, परिणामे वियुज्यते ।
हिंसा कायवियोगेन, पीडाऽतः पापकारणम् ॥

१४

शरीरी म्रियतां मा वा, ध्रुवं हिंसा प्रमादिनाम् ।
सा प्राणव्यपरोपेऽपि, प्रमादरहितस्य न ॥

१५

न यत्प्रमादयोगेन, जीवितव्यपरोपणम् ।
त्रसानां स्थावराणां च, तदहिंसाव्रतं मतम् ॥

१६

कर्मणा मनसा वाचा, सर्वभूतेषु सर्वदा ।
अक्लेशजननं प्रोक्ता, त्वहिंसा परमर्षिभिः ॥

१७

जरायुजाण्डजादीनां, वाङ्मनःकर्मभिः क्वचित् ।
युक्तः कुर्वीत न द्रोहं, सर्वसङ्गांश्च वर्जयेत् ॥

१८

जरायुजाण्डजोद्भिज्जस्वेदजानि कदाचन ।
ये न हिंसन्ति भूतानि, शुद्धात्मानो दयापराः ॥

१९

अहिंसार्थाय भूतानां, धर्मप्रवचनं कृतम् ।
यः स्यादहिंसासंयुक्तः, स धर्म इति निश्चयः ॥

२०

अहिंसा परमो धर्मस्तथाऽहिंसा परो दमः ।
अहिंसा परमं दानमहिंसा परमं तपः ॥

२१

अहिंसा परमो यज्ञस्तथाऽहिंसा परं फलम् ।
अहिंसा परमं मित्रमहिंसा परमं सुखम् ॥

२२

सर्वयज्ञेषु वा दानं, सर्वतीर्थेषु वाऽऽप्लुतम् ।
सर्वदानफलं वाऽपि, नैतत् तुल्यमहिंसया ॥

२३

अहिंस्रस्य तपोऽक्षय्यमहिंस्रो यजते सदा ।
अहिंस्रः सर्वभूतानां, यथा माता यथा पिता ॥

२४

अहिंसा परमं दानमहिंसा परमो दमः ।
अहिंसा परमो यज्ञस्तथाऽहिंसा परं पदम् ॥

२५

अहिंसा परमं ध्यानमहिंसा परमं तपः ।
अहिंसा परमं ज्ञानमहिंसा परमं पदम् ॥

२६

अहिंसा परमो धर्मस्तथाऽहिंसा परं तपः ।
अहिंसा परमं ज्ञानमहिंसा परमं पदम् ॥

२७

अहिंसा परमो धर्मो, ह्यहिंसैव परं तपः ।
अहिंसा परमं दानमित्याहुर्मुनयः सदा ॥

२८

अहिंसा परमं दानमहिंसा परमो दमः ।
अहिंसा परमो जापः, अहिंसा परमं शुभम् ॥



For Private And Personal Use Only

२९

सर्वयज्ञेषु यद्दानं, सर्वतीर्थेषु यत्फलम् ।
सर्वदानफलं वाऽपि, तन्न तुल्यमहिंसया ॥

३०

एतत्फलमहिंसाया भूयश्च कुरुपुङ्गव ! ।
न हि शक्ता गुणा वक्तुमपि वर्षशतैरपि ॥

३१

सर्ववेदाधिगमनं, सर्वतीर्थावगाहनम् ।
सर्वयज्ञफलं चैव, नैव तुल्यमहिंसया ॥

३२

नास्त्यहिंसापरं पुण्यं, नास्त्यहिंसापरं सुखम् ।
नास्त्यहिंसापरं ज्ञानं, नास्त्यहिंसापरो दमः ॥

३३

दीर्घमायुः परं रूपमारोग्यं श्लाघनीयता ।
अहिंसायाः फलं सर्वं किमन्यत् कामदैव सा ॥

३४

४१ लक्ष्मीः पाणितले तस्य, स्वर्गस्तस्य गृहाङ्गणे ।
कुरुते यो जनः सर्वजीवरक्षां सदाऽऽदरात् ॥

# हिंसा।

१

दमो देवगुरूपास्तिर्दानमध्ययनं तपः ।
सर्वमप्येतदफलं, हिंसां चेन्न परित्यजेत् ॥

२

कुर्याद्वर्षसहस्रं तु, अहन्यहनि मज्जनम् ।
सागरेणापि कृत्स्नेन वधको नैव शुध्यति ॥

३

शमशीलदयामूलं, हित्वा धर्मं जगद्धितम् ।
अहो ! हिंसाऽपि धर्माय, जगदे मन्दबुद्धिभिः ॥

४

प्रमादेन यथा विद्या, कुशीलेन यथा धनम् ।
कपटेन यथा मैत्री, तथा धर्मो न हिंसया ॥

५

ये भक्षयन्त्यन्यपलं, स्वकीयपलपुष्टये ।
त एव घातका यन्न, वधको भक्षकं विना ॥

६

पङ्गु-कुष्ठि-कुणित्वादि, दृष्ट्वा हिंसाफलं सुधीः ।
निरागस्त्रसजन्तूनां, हिंसां संकल्पतस्त्यजेत् ॥

७

शिलां समधिरूढाश्च, निमज्जन्ति जलान्तरे ।
हिंसाश्रिताश्च ते तद्वत्, समाश्रयन्ति दुर्गतिम् ॥

८

यावन्ति पशुरोमाणि, पशुगात्रेषु भारत ! ।
तावद्वर्षसहस्राणि, पच्यन्ते नरके नराः ॥

९

स कमलवनमग्नेर्वासरं भास्करास्ता-
दमृतमुरगवक्त्रात् साधुवादं विवादात् ।
रुगपगममजीर्णाज्जीवितं कालकूटा-
दभिलषति वधाद् यः प्राणिनां धर्ममिच्छेत् ॥

# दया।

१

परस्मिन्बन्धुवर्गे वा, मित्रे द्वेष्ये रिपौ तथा ।
आत्मवद्वर्तितव्यं हि दयैषा परिकीर्तिता ॥

२

सत्यं तीर्थं क्षमा तीर्थं, तीर्थमिन्द्रियनिग्रहः । ४१
सर्वभूतदया तीर्थं सर्वत्रार्जवमेव च ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

२

क्षान्तितुल्यं तपो नास्ति, संतोषान्न सुखं परम् ।
नास्ति तृष्णासमो व्याधिर्न च धर्मो दयापरः ॥

३

न च विद्यासमो बन्धुर्न च व्याधिसमो रिपुः ।
न चापत्यसमः स्नेही, न च धर्मो दयापरः ॥

४

प्रशस्ताचरणं नित्यमप्रशस्तविसर्जनम् ।
एतद्धि मङ्गलं प्रोक्तं, मुनिभिस्तत्त्वदर्शिभिः ॥

५

धर्मो जीवदयातुल्यो, न क्वापि जगतीतले ।
तस्मात् सर्वप्रयत्नेन, कार्या जीवदयाऽङ्गिभिः ॥

६

लावण्यरहितं रूपं, विद्यया वर्जितं वपुः ।
जलत्यक्तं सरो भाति, तथा धर्मो दयां विना ॥

७

दयाऽङ्गना सदा सेव्या, सर्वकामफलप्रदा ।
सेविताऽसौ करोत्याशु, मानसं करुणामयम् ॥

८



अहिंसालक्षणो धर्मोऽधर्मश्च प्राणिनां वधः ।
तस्माद्धर्मार्थिभिर्लोकैः, कर्तव्या प्राणिनां दया ॥

९

दयाहीनं निष्फलं स्यान्नास्ति धर्मस्तु तत्र हि ।
एते वेदा अवेदाः स्युर्दया यत्र न विद्यते ॥

१०

सर्वे वेदा न तत् कुर्युः, सर्वे यज्ञाश्च भारत ! ।
सर्वे तीर्थाभिषेकाश्च, यत् कुर्यात् प्राणिनां दया ॥

११

न सा दीक्षा न सा भिक्षा, न तद्दानं न तत्तपः ।
न तद् ध्यानं न तन्मौनं, दया यत्र न विद्यते ॥

१२

यो बन्धन–वधक्लेशान्, प्राणिनां न चिकीर्षति ।
स सर्वस्य हितप्रेप्सुः, सुखमत्यन्तमश्नुते ॥

१३

अहिंसापूर्वको धर्मो, यस्मात्सर्वहिते रतः ।
यूका––मत्कुण––दंशादींस्तस्मात्तानपि रक्षयेत् ॥

१४

दयां विना देवगुरुक्रमार्चा–
स्तपांसि सर्वेन्द्रिययन्त्रणानि ।
दानानि शास्त्राध्ययनानि सर्वं,
सैन्यं गतस्वामि यथा तथैव ॥

१५

आयुर्दीर्घतरं वपुर्वरतरं गोत्रं गरीयस्तरं ।
वित्तं भूरितरं बलं बहुतरं स्वामित्वमुच्चैस्तरम् ॥
आरोग्यं विगतान्तरं त्रिजगति श्लाघ्यत्वमल्पेतरं ।
संसाराम्बुनिधिं करोति सुतरं चेतः कृपार्द्रान्तरम् ॥

१६

संसारे मानुष्यं, सारं मानुष्ये च कौलीन्यम् ।
कौलीन्ये धर्मित्वं, धर्मित्वे चापि सदयत्वम् ॥

## यज्ञ ।

१

निहतस्य पशोर्यज्ञे स्वर्गप्राप्तिर्यदीष्यते ।
स्वपिता यजमानेन किं न तस्मिन्निहन्यते ? ॥

२

अश्वं नैव गजं नैव व्याघ्रं नैव च नैव च ।
अजापुत्रं बलिं दद्याद् दैवो दुर्बलघातकः ॥

३

नाहं स्वर्गफलोपभोगतृषितो नाभ्यर्थितस्त्वं मया ।
संतुष्टस्तृणभक्षणेन सततं साधो ! न युक्तं तव ॥
स्वर्गं यान्ति यदि त्वया विनिहता यज्ञे ध्रुवं प्राणिनो ।
यज्ञं किं न करोषि मातृपितृभिः पुत्रैस्तथा बान्धवैः ! ॥ 

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

४

धर्मश्चेत् परदारसङ्गकरणाद्धर्मः सुरासेवनात् ।
संपुष्टिः पशुमत्स्यमांसनिकराहाराच्च हे वीर ! ते ॥
हत्वा प्राणिचयस्य चेत्तव भवेत् स्वर्गापवर्गाप्तये ।
कोऽसत्कर्मतया तदा परिचितः स्यान्नेति जानीमहे ॥

## सत्य ।

१

सत्येन धार्यते पृथ्वी, सत्येन तपते रविः ।
सत्येन वायवो वान्ति, सर्वं सत्ये प्रतिष्ठितम् ॥

२

सदयं हृदयं यस्य, भाषितं सत्यभूषितम् ।
कायः परहिते यस्य, कलिस्तस्य करोति किम् ॥

३

विश्वासायतनं विपत्तिदलनं देवैः कृताराधनं ।
मुक्तेः पथ्यदनं जलाग्निशमनं व्याघ्रोरगस्तंभनम् ॥
श्रेयः संवननं समृद्धिजननं सौजन्यसंजीवनम् ।
कीर्त्तेः केलिवनं प्रभावभवनं सत्यं वचः पावनम् ॥

४

नानृतात्पापकं किञ्चिन्न सत्यात्सुकृतं परम् ।
विवेकान्न परो बन्धुरिति वेदविदो विदुः ॥



५

सत्यं ब्रूयात्प्रियं ब्रूयान्न ब्रूयात्सत्यमप्रियम् ।
नासत्यं च प्रियं ब्रूयात्, एष धर्मः सनातनः ॥

६

न पुत्रात्परमो लाभो, न भार्यायाः परं सुखम् ।
न धर्मात्परमं मित्रं, नानृतात्पातकं परम् ॥

७

सत्यं जनविराधाय, असत्यं जनरञ्जनम् ।
सुरा विक्रीयते स्थाने, दधि क्षीरं गृहे गृहे ॥

८

सत्यमेव जयते नानृतम् ,सत्येन पन्था विततो देवयानः
येनाक्रमन्तृष्यो ह्यात्मकामा,यत्र तत्सत्यस्य परमं निधानम्

९

सत्यं सत्सु सदा धर्मः, सत्यं धर्मः सनातनः ।
सत्यमेव नमस्येत, सत्यं हि परमा गतिः ॥

१०

सत्यं मृदु प्रियं वाक्यं, धीरो हितकरं वदेत् ।
आत्मोत्कर्षं तथा निन्दां परेषां परिवर्जयेत् ॥

११

सत्यमेव व्रतं यस्य, दया दीनेषु सर्वदा ।
कामक्रोधौ वशे यस्य, स साधुः कथ्यते बुधैः ॥

१२

नास्ति सत्यसमो धर्मो, न सत्याद्विद्यते परम् ।
न हि तीव्रतरं किञ्चिद्-नृतादिह विद्यते ॥

१३

सत्येन पूयते साक्षी, धर्मः सत्येन वर्द्धते ।
तस्मात्सत्यं हि वक्तव्यं, सर्ववर्णेषु साक्षिभिः ॥

१४

सत्यं स्वर्गस्य सोपानं, पारावारस्य नौरिव ।
न पावनतमं किञ्चित्सत्यादध्यगमं क्वचित् ॥

१५

सत्यधर्मं समाश्रित्य, यत्कर्म कुरुते नरः ।
तदेव सकलं कर्म, सत्यं जानीहि सुव्रते ॥

१६

ऋषयश्चैव देवाश्च, सत्यमेव हि मेनिरे ।
सत्यवादी हि लोकेऽस्मिन्, पदं गच्छति चाक्षयम् ॥

१७

भूमिः कीर्तिर्यशो लक्ष्मीः, पुरुषं प्रार्थयन्ति हि ।
सत्यं समनुवर्तन्ते, सत्यमेव भजेत्ततः ॥

१८

ये वदन्तीह सत्यानि, प्राणत्यागेऽप्युपस्थिते ।
प्रमाणभूता भूतानां, दुर्गाण्यति तरन्ति ते ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

१९

न तत्त्ववचनं सत्यं, नातत्त्ववचनं मृषा ।
यद्भूतहितमत्यन्तं, तत्सत्यमिति कथ्यते ॥

२०

सत्यहीना वृथा पूजा, सत्यहीनो वृथा जपः ।
सत्यहीनं तपो व्यर्थमूषरे वपनं यथा ॥

२१

नासत्यवादिनः सख्यं, न पुण्यं न यशो भुवि ।
दृश्यते नापि कल्याणं, कालकूटमिवाश्नतः ॥

२२

यथार्थकथनं यच्च, सर्वलोके सुखप्रदम् ।
तत्सत्यमिति विज्ञेयमसत्यं तद्विपर्ययम् ॥

२३

सत्येन रक्ष्यते धर्मो, विद्याऽभ्यासेन रक्ष्यते ।
मृज्यया रक्ष्यते रूपं, कुलं वृत्तेन रक्ष्यते ॥

२४

प्रियं पथ्यं वचस्तथ्यं, सूनृतव्रतमुच्यते ।
तत्तथ्यमपि नो तथ्यमप्रियं चाहितं च यत् ॥

२५

अग्निना सिच्यमानोऽपि, वृक्षो वृद्धिं न चाप्नुयात् ।
तथा सत्यं विना धर्मः, पुष्टिं नाप्नोति कर्हिचित् ॥

२६

सत्ये प्रतिष्ठिता लोकाः, धर्मः सत्ये प्रतिष्ठितः ।
सत्ये प्रतिष्ठितं ज्ञानं, सर्वं सत्ये प्रतिष्ठितम् ॥

२७

नास्ति सत्याद् परो धर्मो, नानृतात् पातकं परम् ।
स्थितिर्हि सत्यं धर्मस्य तस्मात्सत्यं न लोपयेत् ॥

२८

तस्याऽग्निर्जलमर्णवः स्थलमरिर्मित्रं सुराः किंकराः ।
कान्तारं नगरं गिरिर्गृहमहिर्माल्यं मृगारिर्मृगः ॥
पातालं बिलमस्त्रमुत्पलदलं व्यालः शृगालो विषं ।
पीयूषं विषमं समं च वचनं सत्याञ्चितं वक्ति यः ॥

२९

चञ्चन्मस्तकमौलिरत्नविकटज्योतिश्छटाडम्बरै— ।
र्देवाः पल्लवयन्ति यच्चरणयोः पीठे लुठन्तोऽप्यमी ॥
कुर्वन्ति ग्रहलोकपालखचरा यत्प्रातिहार्यं नृणाम् ।
शाम्यन्ति ज्वलनादयश्च नियतं तत्सत्यवाचः फलम् ॥

## असत्य ।

१

कामाल्लोभाद्भयात्क्रोधात् साक्षिवादात्तथैव च ।
मिथ्या वदति यत्पापं, तदसत्यं प्रकीर्तितम् ॥

२

कन्या–गो–भूम्यलीकानि, न्यासापहरणं तथा ।
कूटसाक्ष्यं च पञ्चेति, स्थूलासत्यानि संत्यजेत् ॥

३

सर्वलोकविरुद्धं यद्, यद् विश्वसितघातकम् ।
यद्विपक्षश्च पुण्यस्य, न वदेत् तदनृतम् ॥

४

याऽरण्ये रोदनात् सिद्धिर्या, सिद्धिः क्लीवकोपनात् ।
कृतघ्नसेवनात् सिद्धिः, सा सिद्धिः कूटभाषणात् ॥

५

वणिक् पण्याङ्गना दस्युर्द्यूतकृत् पारदारिकः ।
द्वारपालश्च कौलश्च, सप्तासत्यस्य मन्दिरम् ॥

६

निगोदेष्वथ तिर्यक्षु, तथा नरकवासिषु ।
उत्पद्यन्ते मृषावादप्रसादेन शरीरिणः ॥

७

पारदारिक–दस्यूनामस्ति काचित् प्रतिक्रिया ।
असत्यवादिनः पुंसः, प्रतीकारो न विद्यते ॥

८

मानाद्वा यदि वा लोभात्, क्रोधाद्वा यदि वा भयात् ।
यो न्यासमन्यथा ब्रूते, स याति नरकं नरः ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

९

धर्महानिरविश्वासो, देहार्थव्यसनं तथा ।
असत्यभाषिणां निन्दा, दुर्गतिश्चोपजायते ॥

१०

असत्यवक्तुर्भुवि पक्षपातं, कुर्यान्न विद्वान् किल सङ्कटेऽपि
तेन ध्रुवं हि वसुराजवत् स, इहापवादं नरकं परत्र ॥

११

मूकता मतिवैकल्यं मूर्खता बोधविच्युतिः ।
बाधिर्यं मुखरोगित्वमसत्यादेव देहिनाम् ॥

१२

कुटुम्बं जीवितं वित्तं यद्यसत्येन वर्द्धते ।
तथापि युज्यते वक्तुं नासत्यं शीलशालिभिः ॥

## अचौर्य ।

१

प्रच्छन्नं वा प्रकाशं वा, निशायामथवा दिवा ।
स्यात् परद्रव्यहरणं स्तेयं तत्प्रकीर्तितम् ॥

२

दुर्बलस्य बलं राजा, बालानां रोदनं बलम् ।
बलं मूर्खस्य मौनित्वं, चौराणामनृतं बलम् ॥

३

मणिमुक्ताप्रवालानि, हृत्वा लोभेन मानवः ।
विविधानि च रत्नानि, यमद्वारेषु जायते ॥

४

चौर्यकर्मप्रभावेण, सत्यघोषो द्विजोत्तमः ।
दुःखं हि परमं प्राप्तो, पातकं किमतः परम् ॥

५

शूलिकारोहणं केचिच्छिरश्छेदं तथा परे ।
नासिकाकर्णच्छेदादि, केचिद्वै चतुरङ्गताम् ॥

६

धनहानिः राजदण्डं, कीर्तिनाशं तथैव च ।
चौर्यकर्मप्रसादेन, प्राप्यंते दुःखकोटयः ॥

७

अदत्तं गृह्यते यच्च, चौर्यकर्म तदेव हि ।
न्यासाऽपहारजं पापं, न भूतं न भविष्यति ॥

८

अन्ये ये ये नरा लोके, चौर्यकर्मप्रभावतः ।
दुःखं हि परमं प्राप्ता, कस्तांस्तान् कथयितुं क्षमः ॥

९

वित्तमेव मतं सूत्रे, प्राणा बाह्याः शरीरिणाम् ।
तस्यापहारमात्रेण, स्युस्ते प्रागेव घातिताः ॥

१०

अनादानमदत्तस्यास्तेयव्रतमुदीरितम ।
बाह्यप्राणा नृणामर्थो, हरता तं हता हि ते ॥

११

परार्थग्रहणे येषां, नियमः शुद्धचेतसाम् ।
अभ्यायान्ति श्रियस्तेषां, स्वयमेव स्वयंवराः ॥

१२

यदा सर्वं परद्रव्यं, बहिर्वा यदि वा गृहे ।
अदत्तं नैव गृह्णाति, ब्रह्म संपद्यते तदा ॥

१३

पतितं विस्मृतं नष्टं स्थितं स्थापितमाहितम् ।
अदत्तं नाददीत स्वं परकीयं क्वचित्सुधीः ॥

१४

हृदि यस्य पदं धत्ते परवित्तामिषस्पृहा ।
करोति किं न किं तस्य, कण्ठलग्नेव सर्पिणी ॥

१५

गुरवो लाघवं नीता, गुणिनोऽप्यत्र खण्डिताः ।
चौरसंश्रयदोषेण, यतयो निधनं गताः ॥


४५

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

१६

विषयविरतिमूलं संयमोद्दामशाखम्,
यमदलशमपुष्पं ज्ञानलीलाफलाढ्यम् ।
विबुधजनशकुन्तैः सेवितं धर्मवृक्षं,
दहति मुनिरपीह स्तेयतीव्रानलेन ॥

## चौर्य ।

१

तदाद्यं स्वामिनाऽदत्तं, जीवादत्तं तथाऽपरम् ।
तृतीयं तु जिनादत्तं, गुर्वदत्तं तुरीयकम् ॥

२

एकस्यैकं क्षणं दुःखं, मार्यमाणस्य जायते ।
सपुत्रपौत्रस्य पुनर्यावज्जीवं हृते धने ॥

३

अनिष्टः खेचरे घूकः, स्वामिद्रोही नरेषु च ।
अनिष्टादप्यनिष्टं च, अदत्तमपलक्षणे ॥

४


अदत्तादानमाहात्म्यमहो वाचामगोचरम् ।
यदर्थमाददानानामनर्थोऽभ्येति सद्मनि ॥

५

दौर्भाग्यं प्रेष्यतां दास्यमङ्गच्छेदं दरिद्रताम् ।
अदत्तात्तफलं ज्ञात्वा स्थूलस्तेयं विवर्जयेत् ॥

६

यातनां विविधामत्र, परत्र नरके गतिम् ।
दौर्भाग्यं च दरित्वं. लभते चौर्यतो नरः ॥

७

कातराणां यथा धैर्यं, वन्ध्यानां संततिर्यथा ।
न विश्वासस्तथा लोके, नृणामदत्तहारिणाम् ॥

## ब्रह्मचर्यम् ।

१

ब्रह्मचर्यं परं शौचं, ब्रह्मचर्यं परन्तपः ।
ये स्थिता ब्रह्मचर्येण, ब्राह्मणास्ते दिवं गताः ॥

२

धर्म्मं यशस्यमायुष्यं, लोकद्वयरसायनम् ।
अनुमोदामहे ब्रह्मचर्यमेकान्तनिर्मलम् ॥

३

समुद्रतरणे यद्वदुपायो नौः प्रकीर्तिता ।
संसारतरणे तद्वत्, ब्रह्मचर्यं प्रकीर्तितम् ॥

४

नीरोगः कान्तिसम्पन्नः, सर्वदुःखविवर्जितः ।
ब्रह्मचारी भवेल्लोके, पाप्मना च विवर्जितः ॥

५

किं बहूक्तेन लोकेऽस्मिन् साधनं यद्धि विद्यते ।
ब्रह्मचर्ये तु तत्सर्वमन्तर्भवति सर्वथा ॥

६

यथा गजपदे सर्वे, पादा अन्तर्भवन्ति हि ।
नैतस्मादधिकं किञ्चिद्, ब्रह्मचर्याद्धि विद्यते ॥

७

सर्वसाधनसम्पन्ना ब्रह्मचर्यविवर्जिताः ।
क्लेशं हि मुनयो भेजुर्विद्वांसोऽपि च कोटिशः ॥

८

कर्मणा मनसा वाचा, सर्वावस्थासु सर्वदा ।
सर्वत्र मैथुनत्यागो, ब्रह्मचर्यं प्रचक्षते ॥

९

आजन्ममरणाद्यस्तु, ब्रह्मचारी भवेदिह ।
न तस्य किञ्चिदप्राप्यमिति विद्धि नराधिप ! ॥

१०

आयुस्तेजो बलं वीर्यं, प्रज्ञा श्रीश्च महायशाः ।
पुण्यञ्च प्रीतिमत्त्वं च, हन्यतेऽब्रह्मचर्यया ॥ ४६

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

११

मरणं बिन्दुपातेन जीवनं विन्दुधारणात् ।
तस्माद्यतिः प्रयत्नेन, कुरुते विन्दुधारणम् ॥

१२

यावद्बिन्दुः स्थितो देहे, तावन्मृत्योर्भयं कुतः ? ।
एवं संरक्षयेद्बिन्दुं, मृत्युं जयति योगवित् ॥

१३

शुक्रं तस्माद्विशेषेण, रक्षन्नारोग्यमिच्छति ।
धर्मार्थकाममोक्षाणामारोग्यं मूलकारणम् ॥

१४

सुखं शय्या सूक्ष्मवस्त्रं, ताम्बूलं स्नानमञ्जनं ।
दन्तकाष्टं सुगन्धञ्च, ब्रह्मचर्यस्य दूषणम् ॥

१५

ब्रह्मचर्यप्रतिष्टायां वीर्यलाभो भवत्यपि ।
सुरत्वं मानवो याति, चान्ते याति परां गतिम् ॥

१६

चिरायुषः सुसंस्थाना, दृढसंहनना नराः ।
तेजस्विनो महावीर्या भवेयुर्ब्रह्मचर्यतः ॥

१७

मृत्युव्याधिजरानाशी, पीयूषं परमौषधम् ।
ब्रह्मचर्यमहद्बलः, सत्यमेव वदाम्यहम् ॥

१८

शान्ति कान्ति स्मृतिं ज्ञान–मारोग्यञ्चापि सन्ततिम् ।
य इच्छति महद्धर्मं, ब्रह्मचर्यं चरेदिह ॥

१९

ब्रह्मचर्यं परं ज्ञानं, ब्रह्मचर्यं परं बलम् ।
ब्रह्मचर्यमयो ह्यात्मा, ब्रह्मचर्यैव तिष्ठति ॥

२०

पुष्पं दृष्ट्वा फलं दृष्ट्वा, दृष्ट्वा योषित्यौवनम् ।
त्रीणि रत्नानि दृष्ट्वैव, कस्य नोच्चलते मनः ? ॥

२१

पिता यस्य शुचिर्भूतो, माता यस्य पतिव्रता ।
ताभ्यां यः सूनुरुत्पन्नस्तस्य नोच्चलते मनः ॥

२२

अग्निकुण्डसमा नारी, घृतकुम्भसमो नरः ।
जानुस्थिता परस्त्री चेत्कस्य नोच्चलते मनः ? ॥

२३

मनो धावति सर्वत्र, मदोन्मत्तगजेन्द्रवत् ।
ज्ञानाङ्कुशे समुत्पन्ने, तस्य नोच्चलते मनः ॥

२४

ब्रह्मचर्यं भवेन्मूलं, सर्वेषां व्रतधारिणां ।
ब्रह्मचर्यस्य भंगे तु, व्रतं सर्वं निरर्थकम् ॥

२५

मैथुनं ये न सेवन्ति, ब्रह्मचारी दृढव्रताः ।
ते संसारसमुद्रस्य, पारं गच्छन्ति शीघ्रतः ॥

२६

देवमानुषतिर्यक्षु, मैथुनं वर्जयेद् यदा ।
कामरागविरक्तश्च, ब्रह्म सम्पद्यते तदा ॥

२७

दिव्यौदारिककामानां, कृतानुमतिकारितैः ।
मनोवाक्कायतस्त्यागो, ब्रह्माष्टादशधा मतम् ॥

२८

संतोषः स्वेषु दारेषु, त्यागश्चापरयोषिताम् ।
प्रथयन्ति गृहस्थानां, चतुर्थं तदणुव्रतम् ॥

२९

रामासङ्गं परित्यज्य, व्रतं ब्रह्म समाचरेत् ।
ब्रह्मचारी स विज्ञेयो, न पुनर्बद्धघोटकः ॥

३०

स्नानमुद्वर्तनाभ्यङ्गं, नखकेशादिसत्क्रियाम् ।
गन्ध–माल्यं प्रदीपं च त्यजन्ति ब्रह्मचारिणः ॥

३१

ब्रह्मचर्यं ध्रुवं यज्ञः, परब्रह्मैककारणम् ।
देहशोभा तदर्थं हि, त्यज्यते ब्रह्मचारिभिः ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

३२

यः स्वदारेषु सन्तुष्टः, परदारपराङ्मुखः ।
स गृही ब्रह्मचारित्वाद् यतिकल्पः प्रकल्पते ॥

३३

योनियन्त्रसमुत्पन्नाः, सुसूक्ष्मा जन्तुराशयः ।
पीड्यमाना विपद्यन्ते यत्र तन्मैथुनं त्यजेत् ॥

३४

रम्यमापातमात्रे यत् परिणामेऽति दारुणम् ।
किंपाकफलसंकाशं तत् कः सेवेत मैथुनम् ॥

३५

कम्पः स्वेदः श्रमो मूर्छा भ्रमिर्ग्लानिर्बलक्षयः ।
राजयक्ष्मादिरोगाश्च भवेयुर्मैथुनोत्थिताः ॥

३६

वाक्य-मन्त्र-रसादीनां सिद्धिः कीर्त्यादयो गुणाः ।
नश्यन्ति तत्क्षणादेव अब्रह्मसेवनान्नृणाम् ॥

## भोग निषेध ।

१

सुगन्धो वनिता वस्त्रं, गीतं ताम्बूलभोजनम् ।
मन्दिरं वाहनं चैव, अष्टौ भोगाः प्रकीर्तिताः ॥

२

वरं हालाहलं भुक्तं, विषं तद् भवनाशनम् ।
न तु भोगविषं भुक्तमनन्तभवदुःखदम् ॥

३

तदिन्द्रियजयं कुर्यान्मनःशुद्ध्या महामतिः ।
यां विना यमनियमैः, कायक्लेशो वृथा नृणाम् ॥

४

इन्द्रियाणि प्रवर्तन्ते, विषयेषु निरन्तरम् ।
सज्ज्ञानभावनासक्ता वारयन्ति हिते रताः ॥

५

स्मरदहनसुतीव्रानन्तसन्तापविद्धं,
भुवनमिति समस्तं वीक्ष्य योगिप्रवीराः ।
विगतविषयसङ्गाः प्रत्यहं संश्रयन्ते,
प्रशमजलधितीरं संयमारामरम्यम् ॥

६

परिभवफलवल्लीं दुःखदावानलालीम्,
विषयजलधिवेलां श्वभ्रसौधप्रतोलीम् ।
मदनभुजगदंष्ट्रां मोहतन्द्रासवित्रीम्,
परिहर परिणामैर्धैर्यमालम्ब्य नारीम् ॥

७

यासां सीमन्तिनीनां कुरबकतिलकाशोकमाकन्दवृक्षाः,
प्राप्योच्चैर्विक्रियन्ते ललितभुजलतालिङ्गनादीन्विलासान् ।
तासां पूर्णेन्दुगौरं मुखकमलमलं वीक्ष्य लीलारसाढ्यम्,
को योगी यस्तदानीं कलयति कुशलो मानसं निर्विकारम् ॥

८

तावद्धत्ते प्रतिष्ठां परिहरति मनश्चापलं चैष तावत्,
तावत्सिद्धान्तसूत्रं स्फुरति हृदि परं विश्वतत्त्वैकदीपम् ।
क्षीराकूपारवेलावलयविलसितैर्मानिनीनां कटाक्षै-
र्यावन्नो हन्यमानं कलयति हृदयं दीर्घदोलायितानि ॥

९

येषां वाग्भुवनोपकारचतुरा प्रज्ञा विवेकास्पदम्,
ध्यानं ध्वस्तसमस्तकर्मकवचं वृत्तं कलङ्कोज्झितम् ।
सम्यग्ज्ञानसुधातरङ्गनिचयैश्चेतश्च निर्वापितम्,
धन्यास्ते शमयन्त्यनङ्गविशिखव्यापारजाता रुजः ॥

## परिग्रह ।

१

वरं मौनं कार्यं न च वचनमुक्तं यदनृतं ।
वरं क्लैब्यं पुंसां न च परकलत्राभिगमनं ॥
वरं प्राणत्यागो न च पिशुनवाक्येष्वभिरुचिः ।
वरं भिक्षाशित्वं न च परधनास्वादनसुखम् ॥



For Private And Personal Use Only

२

संसारमूलमारम्भास्तेषां हेतुः परिग्रहः ।
तस्मादुपासकः कुर्यादल्पमल्पं परिग्रहे ॥

३

असंतोषमविश्वासमारम्भं दुःखकारणम् ।
मत्वा मूर्छाफलं कुर्यात्, परिग्रहनियन्त्रणम् ॥

४

करोति हे वैश्यसुत ! यावन्मात्रं परिग्रहम् ।
तावन्मात्रं स एवास्य, दुःखं चेतसि यच्छति ॥

५

परिग्रहार्थमारंभमसंतोषाद्वितवन्ते ।
संसारवृद्धिस्तेनैव, गृह्णीत तदिदं व्रतम् ॥

६

परिग्रहमहत्त्वाद्धि, मज्जत्येव भवांबुधौ ।
महापोत इव प्राणी, त्यजेत् तस्मात् परिग्रहम् ॥

७

सर्वभावेषु मूर्छायास्त्यागः स्यादपरिग्रहः ।
यदसत्स्वपि जायेत, मूर्छाया चित्तविप्लवः ॥

८

मूर्च्छाछन्नधियां, सर्वं जगदेव परिग्रहः ।
मूर्च्छया रहितानां तु, जगदेवापरिग्रहः ॥

९

चित्तेऽन्तर्ग्रंथगहने, बहिर्निग्रंथता वृथा ।
त्यागात् कंचुकमात्रस्य, भुजगो नहि निर्विषः ॥

१०

त्यक्तपुत्रकलत्रस्य, मूर्च्छामुक्तस्य योगिनः ।
चिन्मात्रप्रतिबद्धस्य, का पुद्गलनियंत्रणा ॥

११

यस्त्यक्त्वा तृणवद्, बाह्यमांतरं च परिग्रहम् ।
उदास्ते तत्पदांभोजं, पर्युपास्ते जगत्त्रयी ॥

१२

कालुष्यं जनयन् जडस्य रचयन् धर्मद्रुमोन्मूलनं ।
क्लिश्यन्नीतिकृपाक्षमाकमलिनीं लोभाम्बुधिं वर्द्धयन् ॥
मर्यादातटमुद्रुजन् शुभमनोहंसप्रवासं दिशन् ।
किं न क्लेशकरः परिग्रहनदीपूरः प्रवृद्धिंगतः ॥

१३

एवं तावदहं लभेय विभवं रक्षेयमेवं तत—
स्तद्वृद्धिं गमयेयमेवमनिशं भुञ्जीय चैवं पुनः ।
द्रव्याशारसरुद्धमानस ! भृशं नात्मानमुत्पश्यसि,
कुद्धयत्क्रूरकृतान्तदन्तपटलीयन्त्रान्तरालस्थितम् ॥

# रात्रि भोजन निषेध ।

१

घोरान्धकार रुद्धाक्षैः, पतन्तो यत्र जन्तवः ।
नैव भोज्ये निरीक्ष्यन्ते, तत्र भुञ्जीत को निशि ? ॥

२

मेधां पिपीलिका हन्ति, यूका कुर्याज्जलोदरम् ।
कुरुते मक्षिका वान्तिं, कुष्टरोगं च कोलिकः ॥

३

कण्टकं दारुखण्डं च, स्वरभङ्गाय जायते ।
इत्यादयो दृष्टदोषाः, सर्वेषां निशि भोजने ॥

४

दिवसस्याष्टमे भागे, मन्दीभूते दिवाकरे ।
नक्तं तत्र विजानीयान्न युक्तं निशि भोजनम् ॥

५

अस्तंगते दिवानाथे, आपो रुधिरमुच्यते ।
अन्नं मांससमं प्रोक्तं, मार्कण्डेयमहर्षिणा ॥

६

नोदकमपि पातव्यं, रात्रावत्र युधिष्ठिर ! ।
तपस्विनां विशेषेण, गृहिणां च विवेकिनाम् ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



७

मृते स्वजनमात्रेऽपि, सूतकं जायते किल ।
अस्तं गते दिवानाथे, भोजनं क्रियते कथम् ? ॥

८

ये रात्रौ सर्वदाऽऽहारं, वर्जयन्ति सुमेधसः ।
तेषां पक्षोपवासस्य, फलं मासेन जायते ॥

९

रक्तं भवन्ति तोयानि, अन्नानि पिशितानि च ।
रात्रिभोजनसक्तस्य, ग्रासे तन्मांसभक्षणम् ॥

१०

उलूकः काकमार्जार—गृद्धशंबरशूकराः ।
अहिवृश्चिकगोधाश्च, जायन्ते रात्रिभोजनात् ॥

११

हृन्नाभिपद्मसङ्कोच—श्चण्डरोचिरपायतः ।
अतो नक्तं न भोक्तव्यं, सूक्ष्मजीवादनादपि ॥

१२

हिंस्यन्ते प्राणिनः सूक्ष्मा, यत्राशुच्यभिभक्ष्यते ।
तद्रात्रिभोजनं संतो, न कुर्वन्ति दयापराः ॥

१३

वासरे च रजन्यां च, यः खादन्नेव तिष्ठति ।
शृङ्गपुच्छपरिभ्रष्टः, स्पष्टं स पशुरेव हि ॥

१४

स्वपरसमये गर्ह्यं, आद्यं श्वभ्रस्य गोपुरम् ।
सर्वज्ञैरपि यत्यक्तं पापाढ्यं रात्रिभोजनम् ॥

१५

करोति विरतिं धन्यो, यः सदा निशिभोजनात् ।
सोऽर्धं पुरुषायुषस्य, स्यादवश्यमुपोषितः ॥

१६

अह्नो मुखेऽवसाने च, यो द्वे द्वे घटिके त्यजन् ।
निशाभोजनदोषज्ञो-ऽश्नात्यसौ पुण्यभाजनम् ॥

१७

नक्तं न भोजयेद्यस्तु, चातुर्मास्ये विशेषतः ।
सर्वकामानवाप्नोति इह लोके परत्र च ॥

## कर्मादान ।

१

अङ्गारवनशकटभाटकस्फोटजीविका ।
दन्तलाक्षारसकेशविषवाणिज्यकानि च ॥

२

यन्त्रपीडा निर्लाञ्छनमसतीपोषणं तथा ।
दवदानं सरःशोष इति पंचदश त्यजेत् ॥

३

कन्याविक्रयिणश्चैव, रसविक्रयिणस्तथा ।
विषविक्रयिणश्चैव, नरा निरयगामिनः ॥

## सामायिक ।

१

त्यक्तार्त्तरौद्रध्यानस्य, त्यक्तसावद्यकर्मणः ।
मुहूर्तं समता या तां, विदुः सामायिकव्रतम् ॥

२

समता सर्वभूतेषु, संयमः शुभभावना ।
आर्त्तरौद्रपरित्यागस्तद्धि सामायिकं व्रतम् ॥

३

मुहूर्त्तावधिसावद्य–व्यापारपरिवर्जनम् ।
आद्यं शिक्षाव्रतं सामायिकं स्यात् समताजुषां ॥

४

सामायिकं स्यात् त्रिविधं, सम्यक्त्वं च श्रुतं तथा ।
चारित्रं तृतीयं तच्च, गृहिकमनगारिकम् ॥

५

रागादिध्वान्तविध्वंसे, कृते सामायिकांशुना ।
स्वस्मिन् स्वरूपं पश्यन्ति, योगिनः परमात्मनः ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

६

देशसामायिकं श्राद्धो, वितन्वन् घटिकाद्वयम् ।
द्रव्यादीनां व्ययाभावादहो पुण्यं महद्भवेत् ॥

७

दानं सदा यच्छति मार्गणेभ्यः,
सुवर्णभूमेः स्वपतिश्च कश्चित् ।
ततोऽप्यधिकं गदितं मुनीन्द्रैः,
सामायिके पुण्यमतो विधेयम् ॥

८

मोहवह्निमपाकर्तुं, स्वीकर्त्तुं संयमश्रियम् ।
छेत्तुं रागद्रुमोद्यानं समत्वमवलम्ब्यताम् ॥

९

विरज्य कामभोगेषु विमुच्य वपुषि स्पृहाम् ।
समत्वं भज सर्वज्ञ ज्ञानलक्ष्मीकुलास्पदम् ॥

१०

साम्यमेव परं ध्यानं प्रणीतं विश्वदर्शिभिः ।
तस्यैव व्यक्तये नूनं मन्येऽयं शास्त्रविस्तरः ॥

११

तस्यैवाविचलं सौख्यं तस्यैव पदमव्ययम् ।
तस्यैव बन्धविश्लेषः समत्वं यस्य योगिनः ॥

## पौषध व्रत ।

१

चतुष्पर्व्यां चतुर्थादि—कुव्यापारनिषेधनम् ।
ब्रह्मचर्यं क्रियास्नाना—दित्यागः पौषधव्रतम् ॥

२

चत्वारि सन्ति पर्वाणि, मासे तेषु विधीयते ।
उपवासः सदा यस्तत्, पौषधव्रतमीर्यते ॥

३

सर्वारम्भपरित्यागात्, पाक्षिकादिषु पर्वसु ।
विधेयः पौषधोऽजस्र—मिव सूर्ययशा नृपः ॥

४

चतुर्दश्यष्टमीराको—द्दिष्टा—पर्वसु पौषधः ।
विधेयः सौधस्थेनेत्थं, पर्वाण्याराधयेद्गृही ॥

५

गृहिणोऽपि हि धन्यास्ते, पुण्यं ये पौषधव्रतम् ।
दुष्पालं पालयन्त्येव, यथा स चुलनीपिता ॥

६

सर्वेष्वपि तपोयोगः, प्रशस्तः कालपर्वसु ।
अष्टम्यां पञ्चदश्यां च, नियतं पौषधं वसेत् ॥

७

पोषं धर्मस्य धत्ते यत्, तद्भवेत् पौषधव्रतम् ।
तच्चतुर्धा समाख्यात—माहारपौषधादिकम् ॥

## उपवास ।

१

त्यक्तभोगोपभोगस्य, सर्वारंभविमोचिनः ।
चतुर्विधाशनत्याग उपवासो मतो जिनैः ॥

२

असकृज्जलपानात्तु, ताम्बूलस्य च भक्षणात् ।
उपवासः प्रदुष्येत दिवास्वापाच्च मैथुनात् ॥

३

पुष्पाणि चारवस्त्राणि, गन्धमाल्यानुलेपनम् ।
उपवासे न शुध्यंति, दन्तधावनमञ्जनम् ॥

४

कषायविषयाहार—त्यागो यत्र विधीयते ।
उपवासः स विज्ञेयः, शेषं लङ्घनकं विदुः ॥

५

उपावृत्तस्य पापेभ्यो, यस्तु वासो गुणैः सह ।
उपवासः स विज्ञेयः, सर्वभोगविवर्जितः ॥



For Private And Personal Use Only

३

कर्मेन्धनं यदज्ञानात्, संचितं जन्मकानने ।
उपवासशिखी सर्वं, तद्भस्मीकुरुते क्षणात् ॥

## अतिथि व्रत ।

१

हिरण्ये वा सुवर्णे वा, धने धान्ये तथैव च ।
अतिथिं तं विजानीयाद्यस्य लोभो न विद्यते ॥

२

सत्यार्जवदयायुक्तं पापारम्भविवर्जितम् ।
उग्रतपस्समायुक्तमतिथिं विद्धि तादृशम् ॥

३

तिथिपर्वोत्सवाः सर्वे, त्यक्ता येन महात्मना ।
अतिथिं तं विजानीया–च्छेषमभ्यागतं विदुः ॥

४

सदा चान्नादिसंप्राप्ते, साधूनां दानपूर्वकम् ।
भुज्यते यत्तदतिथि–संविभागाभिधं व्रतम् ॥

५

अतिथिभ्योऽशनावास––वासः पात्रादिवस्तुनः ।
यत्प्रदानं तदतिथि––संविभागव्रतं भवेत् ॥

६

धर्मकृत्येषु सारं हि, वैयावृत्यं जगुर्जिनाः ।
तत्पुनर्ग्लानसंबन्धि, विना पुण्यं न लभ्यते ॥

७

वैयावृत्यं वितन्वानः, साधूनां वरभावतः ।
बध्नाति तनुमान्नन्दिषेणवत् कर्म सुन्दरम् ॥

८

कोविदो वाऽथवा मूर्खो, मित्रं वा यदि वा रिपुः ।
निदानं स्वर्गभोगाना—मशनावसरेऽतिथिः ॥

## अतिथि–सत्कारः ।

१

संप्राप्ताय त्वतिथये, प्रदद्यादासनोदके ।
अन्नं चैव यथाशक्ति, सत्कृत्यविधि पूर्वकम् ॥

२

श्रद्धया चान्नदानेन, प्रियप्रश्नोत्तरेण च ।
गच्छतश्चानुयानेन, प्रीतिमुत्पादयेद् गृही ॥

३

अतिथिः पूजितो यस्य, गृहस्थस्य तु गच्छति ।
नान्यस्तस्मात्परो धर्म इति प्राहुर्मनीषिणः ॥

४

पात्रन्त्वतिथिमासाद्य, शीलाढ्यं यो न पूजयेत् ।
स दत्वा दुष्कृतं तस्मै, पुण्यमादाय गच्छति ॥

## कषाय ।

१

पक्षं संज्वलनः प्रत्याख्यानो मासचतुष्टयम् ।
अप्रत्याख्यानको वर्षं, जन्मानन्तानुबन्धकः ॥

२

कषायकलुषो जीवो, रागरंजितमानसः ।
चतुर्गतिभवाम्भोधौ, भिन्ननौरिव सीदति ॥

३

कषायविषयार्त्तानां, देहिनां नास्ति निर्वृत्तिः ।
तेषां च विरमे सौख्यं, जायते परमाद्भुतम् ॥

४

कामः क्रोधश्च लोभश्च, देहे तिष्ठन्ति तस्कराः ।
ज्ञानरत्नमपाहारि, तस्माज्जागृत जागृत ॥

५

कषायान् शत्रुवत् पश्येद्, विषयान् विषवत्तथा ।
मोहं च परमं व्याधिमेवमूचुर्विचक्षणाः ॥


५२

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

६

क्रोधात्प्रीतिविनाशं, मानाद्विनयोपघातमाप्नोति ।
शाठ्यात्प्रत्ययहानिं, सर्वगुणविनाशनं लोभात् ॥

७

नित्यं क्रोधात्तपो रक्षेच्छ्रियं रक्षेच्च मत्सरात् ।
विद्यां मानापमानाभ्यामात्मानं च प्रमादतः ॥

८

हन्तव्यः क्षमया क्रोधो, मानो मार्दवयोगतः ।
माया चार्जवभावेन, लोभः संतोषपोषतः ॥

९

क्षमया मृदुभावेन, ऋजुत्वेनाप्यनीहया ।
क्रोधं मानं तथा मायां, लोभं रुन्ध्याद् यथाक्रमम् ॥

१०

विषयोरगदष्टस्य, कषायविषमोहिनः ।
संयमो हि महामंत्रस्त्राता सर्वत्र देहिनः ॥

११

कषायविजये सौख्यमिन्द्रियाणां च निग्रहे ।
जायते परमोत्कृष्ट—मात्मनो भवभेदियत् ॥

१२

अनादिकालं जीवेन, प्राप्तं दुःखं पुनः पुनः ।
मिथ्यामोहपरीतेन, कषायवशवर्तिना ॥

१३

परीषहजये शूराः शूराश्चेन्द्रियनिग्रहे ।
कषायविजये शूरास्ते शूरा गदिता बुधैः ॥

## क्रोध ।

१

क्रोधो मूलमनर्थानां, क्रोधः संसारवर्द्धनः ।
धर्मक्षयकरः क्रोध—स्तस्मात्क्रोधं विवर्जयेत् ॥

२

क्रोधस्य कालकूटस्य, विद्यते महदन्तरम् ।
स्वाश्रयं दहति क्रोधः, कालकूटो न चाश्रयम् ॥

३

उत्तमे तु क्षणं कोपो, मध्यमे घटिकाद्वयम् ।
अधमे स्यादहोरात्रं, चाण्डाले मरणान्तकः ॥

४

क्रोधो नाशयते धैर्यं, क्रोधो नाशयते श्रुतम् ।
क्रोधो नाशयते सर्वं, नास्ति क्रोधसमो रिपुः ॥

५

यस्तु क्रोधं समुत्पन्नं, प्रज्ञया प्रतिबाधते ।
तेजस्विनन्तं विद्वांसो, मन्यंते तत्त्वदर्शिनः ॥

६

अश्वारोहं यथा दुष्टो, वाजिः गर्ते निपातयेत् ।
एवं क्रोधोऽपि नरके, नरमाशु निपातयेत् ॥

७

क्रुद्धः पापं नरः कुर्यात्क्रुद्धो हन्याद्गुरूनपि ।
क्रुद्धः परुषया वाचा, श्रेयांस्यवमन्यते ॥

८

एतान्दोषान्प्रपश्यद्भिर्जितः क्रोधो मनीषिभिः ।
इच्छद्भिः परमं श्रेय, इह चामुत्र चोत्तमम् ॥

९

मातरं पितरं पुत्रं, भ्रातरं वा सुहृत्तमम् ।
क्रोधाविष्टो नरो हन्ति, स्वामिनं वा सहोदरम् ॥

१०

क्रोधः परितापकरः, सर्वस्योद्वेगकारकः क्रोधः ।
वैरानुषङ्गजनकः, क्रोधः क्रोधः सुगतिहन्ता ॥

११

स्त्री विनश्यति रूपेण, तपः क्रोधेन नश्यति ।
गावो दूरप्रसारेण, हरिणी लोभलिप्सया ॥

१२

क्रोधो हि शत्रुःप्रथमो नराणां, देहस्थितो देहविनाशनाय ।
यथास्थितः काष्ठगतो हि वह्निः, स एव वह्निर्दहते च काष्ठम् ॥




For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

१३

संतापं तनुते भिनत्ति विनयं सौहार्दमुत्सादय—
त्युद्वेगं जनयत्यवद्यवचनं सूते विधत्ते कलिम् ॥
कीर्तिं कृतन्ति दुर्मतिं वितरति व्याहन्ति पुण्योदयं।
दत्ते यः कुगतिं स हातुमुचितो रोषः सदोषः सताम् ॥

१४

हरत्येकदिनेनैव तेजः, षाण्मासिकं ज्वरः।
क्रोधः पुनः क्षणेनाऽपि, पूर्वकोटयार्जितं तपः ॥

१५

मासोपवासनिरतोऽस्तु तनोतु सत्यम्,
ध्यानं करोतु विदधातु बहिर्निवासम्।
ब्रह्मव्रतं धरतु भैक्ष्यरतोऽस्तु नित्यम्,
रोषं करोति यदि सर्वमनर्थकं तत् ॥

१६

भ्रूभंगभंगुरमुखो विकरालरूपो,
रक्तेक्षणो दशनपीडितदंतवासाः।
त्रासंगतोति मनुजो जननिंद्यवेषः,
क्रोधेन कंपिततनुर्भुवि राक्षसो वा ॥

१७

अत्यन्तं क्रोधसंतप्ता, मृतास्ते सर्पमागता।
अद्यापि तत्स्वभावेन, फूत्कारैः भीषणा ननु ॥

१८

क्रोधान्धाः पश्य निघ्नन्ति, पितरं मातरं गुरुम्।
सुहृदं सोदरं दारानात्मानमपि निर्घृणाः ॥

१९

मत्तः प्रमत्तश्चोन्मत्तः, श्रान्तः क्रुद्धो बुभुक्षितः।
लुब्धो भीरुस्त्वरायुक्तः, कामुकश्च न धर्मवित् ॥

२०

क्रोधेन वर्धते कर्म, दारुणं भववर्धनम्।
शिक्षा च क्षीयते सद्यस्तपश्च समुपार्जितम् ॥

२१

क्षमी यत्कुरुते कार्यं, न तत्क्रोधवशंवदः।
कार्यस्य साधनी प्रज्ञा, सा च क्रोधेन नश्यति ॥

२२

दोषं न तं नृपतयो रिपवोऽपि रुष्टाः,
कुर्वन्ति केसरिकरीन्द्रमहोरगा वा।
धर्मं निहत्य भवकाननदाववह्निं,
यं दोषमत्र विदधाति नरस्य रोषः ॥

२३

संचितस्यापि महतो, वत्स! क्लेशेन मानवैः।
यशसस्तपसश्चैव, क्रोधो नाशकरः परः ॥

२४

न तथाऽसिस्तथा तीक्ष्णः, सर्पो वा दुरधिष्ठितः।
यथा क्रोधो हि जन्तूनां, शरीरस्थो विनाशकः ॥

२५

जीवोत्तापकः क्रोधः, क्रोधो वैरस्य कारणम्।
दुर्गतेर्नायकः क्रोधः, क्रोधः शमसुखार्गला ॥

२६

क्रोधो नाशयते बुद्धि–मात्मानं च कुलं धनम्।
धर्मनाशो भवेत्कोपात्, तस्मात्तं परिवर्जयेत् ॥

२७

सुदुष्टमनसा पूर्वं यत्कर्मसमुपार्जितम्।
तद्विपाके भवेदुग्रं, कोऽन्येषां क्रोधमुद्वहेत् ॥

२८

क्रोधो नाम मनुष्यस्य, शरीराज्जायते रिपुः।
येन त्यजन्ति मित्राणि, धर्माच्च परिहीयते ॥

२९

उत्पद्यमानः प्रथमं, दहत्येव स्वमाश्रयम्।
क्रोधः कृशानुवत्पश्चादन्यं दहति वा न वा ॥

३०

आत्मौपम्येन सर्वत्र, दयां कुर्वीत मानवः।
अपकारिणि चेत् कोपः, कोपे कोपः कथं न ते! ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



११

ज्वलद्बब्बूलवद्भाति, कायः प्रायोऽतिकोपितः ।
मुखे छायान्तरे दाहः, सर्वेषां भीप्रदर्शनं ॥

१२

सन्निपातज्वरेणेव, क्रोधेन व्याकुलो नरः ।
कृत्याकृत्यविवेके, हा ! विद्वानपि जडीभवेत् ॥

१३

कोपोऽस्ति यस्य मनुजस्य निमित्तमुक्तो ।
नो तस्य कोऽपि कुरुते गुणिनोऽपि भक्तिम् ॥
आशीविषं भजति को ननु दंदशूकं ।
नानोग्ररोगशमिना मणिनापि युक्तं ! ॥

१४

येनान्धीकृतमानसो न मनुते प्रायः कुलीनोऽपि सन् ।
कृत्याकृत्यविवेकमेत्यधमवल्लोके परित्याज्यताम् ॥
धर्मं नो गणयत्यतिप्रियमपि द्वेष्टि स्वयं खिद्यते ।
स क्षान्तिक्षुरिकाधरेण हृदय ! क्रोधो विजेयस्त्वया ॥

## क्लेश ।

१

स्तोकोऽप्यग्निर्दहत्येव, काष्ठादिप्रभृतं घनम् ।
क्लेशलेशोऽत्र तद्वच्च, वृद्धितस्तनुदाहकः ॥

२

आत्मानं तापयेन्नित्यं, तापयेच्च परानपि ।
उभयोर्दुःखकृत्क्लेशो, यथोष्णा रेणुका क्षितौ ॥

## क्षमा ।

१

क्षमा शस्त्रं करे यस्य, दुर्जनः किं करिष्यति ।
अतृणे पतितो वह्निः, स्वयमेवोपशाम्यति ॥

२

क्षमा बलमशक्तानां, शक्तानां भूषणं क्षमा ।
क्षमा वशीकृतिर्लोके, क्षमया किन्न साध्यते ॥

३

नरस्याभरणं रूपं, रूपस्याभरणं गुणः ।
गुणस्याभरणं ज्ञानं, ज्ञानस्याभरणं क्षमा ॥

४

क्षमा शत्रौ च मित्रे च, यतीनामेव भूषणम् ।
अपराधिषु सत्त्वेषु, नृपाणां सैव दूषणम् ॥

५

क्षमावतामयं लोकः, परश्चैव क्षमावताम् ।
इह सन्मानमृच्छन्ति, परत्र च शुभां गतिम् ॥

६

मन्योर्हि विजयं कृष्णे, प्रशसन्तीह साधवः ।
क्षमावतो जयो नित्यं, साधोरिह सतां मतम् ॥

७

एको धर्म्मः परं श्रेयः, क्षमैका शान्तिरुत्तमा ।
विद्यैका परमा तृप्तिरहिंसैका सुखावहा ॥

८

स्वर्गसुखानि परोक्षाण्यत्यन्तपरोक्षमेव मोक्षसुखम् ।
प्रत्यक्षं प्रशमं सुखं न परवशं न च व्ययप्राप्तम् ॥

९

ददतु ददतु गालीर्गालिमन्तो भवन्तो,
वयमिह तदभावाद्गालिदानेऽसमर्थाः ।
जगति विदितमेतद्दीयते विद्यमानं,
न तु शशकविषाणं कोऽपि कस्मै ददाति ॥

१०

मेतार्यश्च सुकोशलो गजमुनिश्छिन्नत्वचः स्कन्धकः ।
शिष्याः स्कंधक चण्डरुद्रकृतिनो चन्द्रावतंसो नृपः ॥
चन्द्राढिधर्दमदन्तकूरगडुकौ गाढप्रहारी मुनि—
रग्रङ्कारि मृगावतिप्रभृतयस्तीर्णाः क्षमानौकया ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

११

बाह्ये चाध्यात्मिके चैव दुःखे चोत्पादिते क्वचित् ।
न कुप्यति न वा हन्ति सा क्षमा परिकीर्तिता ॥

१२

शम एव परं तीर्थं, शम एव परं तपः ।
शम एव परं ज्ञानं, शमो योगः परस्तथा ॥

१३

क्षान्तिरेव महादानं, क्षान्तिरेव महातपः ।
क्षान्तिरेव महाज्ञानं, क्षान्तिरेव महादमः ॥

१४

कुर्यान्न कर्कशं कर्म, क्षमाशालिनि सज्जने ।
प्रादुर्भवति सप्तार्चिर्मथिताच्चन्दनादपि ॥

१५

क्षमया क्षीयते कर्म, दुःखदं पूर्वसञ्चितम् ।
चित्तं च जायते शुद्धं, विद्वेषभयवर्जितम् ॥

१६

आक्रुष्टोऽहं हतो नैव हतो वा न द्विधाकृतः ।
मारितो न हतो धर्मो मदीयोऽनेन बन्धुना ॥

१७


चिराभ्यस्तेन किं तेन शमेनास्त्रेण वा फलम् ।
व्यर्थीभवति यत्कार्ये समुत्पन्ने शरीरिणाम् ॥

## अभिमान ।

१

वरं प्राण परित्यागो, मा मानपरिखण्डनम् ।
मृत्युस्तु क्षणिका पीडा, मानखंडो पदे पदे ॥

२

अगाधजलसंचारी, न गर्वं याति रोहितः ।
अंगुष्ठोदकमात्रेण, शफरी फर्फरायते ॥

३

खद्योतो द्योतते तावद्यावन्नोदयते शशी ।
उदिते तु सहस्रांशौ, न खद्योतो न चन्द्रमाः ॥

४

विषभारसहस्रेण, गर्वं नायाति वासुकिः ।
वृश्चिको बिन्दुमात्रेण, ऊर्ध्वं वहति कण्टकम् ॥

५

दिव्यं आम्ररसं पीत्वा, गर्वं नो याति कोकिलः ।
पीत्वा कर्दमपानीयं, भेको टरटरायते ॥

६

गङ्गादीनां सकलसरितां प्राप्य तोयं समुद्रः ।
किंचिद्गर्वी न भवति पुनर्दिव्यरत्नाकरोऽपि ॥
एको भेकः परममुदितः प्राप्य गोष्पादनीरं ।
को मे को मे रटति बहुधा स्पर्धया विश्वमुच्चैः ॥

७

संपूर्णं कुम्भो न करोति शब्द-मर्धो घटो घोषमुपैति नूनम् ।
विद्वान् कुलीनो न करोति गर्वं, गुणैर्विहीना बहुजल्पयंति ॥

८

सर्वे यत्र विनेतारः, सर्वे यत्राभिमानिनः ।
सर्वे महत्त्वमिच्छन्ति, कुलं तदवसीदति ॥

९

जातिलाभकुलैश्वर्यं बलरूपतपः श्रुतैः ।
कुर्वन् मदं पुनस्तानि, हीनानि लभते जनः ॥

१०

बलिभ्यो बलिनः सन्ति, वादिभ्यः सन्ति वादिनः ।
धनिभ्यो धनिनः सन्ति, तस्माद्दर्पं त्यजेद् बुधः ॥

११

विद्वानहं सकललब्धिरहं नृपोऽहं,
दाताहमद्भुतगुणोऽहमहं गरीयान् ।
इत्याद्यहङ्कृतिवशात्परितोषमेति,
नो वेत्सि किं परिभवे लघुतां भवित्रीम् ॥ 

For Private And Personal Use Only

१२

अल्पतोयश्चलत्कुम्भो, ह्यल्पदुग्धाश्च धेनवः ।
अल्पविद्यो महागर्वी कुरूपी बहुचेष्टितः ॥

१३

अत्यहंकारयोगेन, ते भवन्ति खरा नराः ।
अद्यापि तत्स्वभावेन, हुं हुं कुर्वन्ति सर्वदा ॥

१४

अरण्यजं तरोः पुष्पं, समुद्राम्भश्च शीतलम् ।
लावण्यं दंभिनां तद्वन्मानिमानं निरर्थकम् ॥

१५

मा तात! साहसं कार्षीर्विभवैर्गर्वमागतः ।
स्वगात्राण्यपि भाराय, भवन्ति हि विपर्यये ॥

१६

विनयश्रुतशीलानां, त्रिवर्गस्य च घातकः ।
विवेकलोचनं लुम्पन्, मानोऽन्धङ्करणो नृणाम् ॥

१७

अहङ्कारो हि लोकानां, नाशाय न तु वृद्धये ।
यथा विनाशकाले स्यात्, प्रदीपस्य शिखोज्ज्वला ॥

१८

शिक्षां लभते नो मानी, विद्यामीयान्न कर्हिचित् ।
विनयादिक्रियाशून्यः, स्तंभवत् स्तब्धतां गतः ॥

१९

कुल-जाति-तपो-रूप-बल-लाभ-श्रुत-श्रियाम् ।
मदात्प्राप्नोति तान्येव, प्राणी हीनानि मूढधीः ॥

२०

तावदाश्रीयते लक्ष्म्या, तावदस्य स्थिरं यशः ।
पुरुषस्तावदेवासौ, यावन्मानान्न हीयते ॥

२१

मानमालम्ब्य मूढात्मा विधत्ते कर्म निन्दितम् ।
कलङ्कयति चाशेषं चरणं चन्द्रनिर्मलम् ॥

## माया ।

१

नमस्ते तव शीलस्य, नमः केदारकंकणम् ।
सहस्राणां शतं नास्ति, वण्डपुच्छो न दृश्यते ॥

२

असूनृतस्य जननी, परशुः शीलशाखिनः ।
जन्मभूमिरविद्यानां, माया दुर्गतिकारणम् ॥

३

दौर्भाग्यजननी माया, माया दुर्गतिदायिनी ।
नृणां स्त्रीत्वप्रदा माया, ज्ञानिभिस्त्यज्यते ततः ॥

४

कौटिल्यपटवः पापा मायया बकवृत्तयः ।
भुवनं वञ्चयमाना, वञ्चयन्ते स्वमेव हि ॥

५

दम्भेन व्रतमास्थाय, यो वाञ्छति परं पदम् ।
लोहनावं समारुह्य, सोऽब्धेः पारं यियासति ॥

६

प्राक् पादयोः पतति खादति पृष्ठमांसं ।
कर्णे कलं किमपि रौति शनैर्विचित्रम् ॥
छिद्रं निरूप्य सहसा प्रविशत्यशंकः ।
सर्वं खलस्य चरितं मशकः करोति ॥

७

तदार्जवमहौषध्या, जगदानन्दहेतुना ।
जयेज्जगद्द्रोहकरीं, मायां विषधरीमिव ॥

८

खड्गधारां मधुलिप्तां, विद्धि मायामृषां ततः ।
वर्जनीया प्रयत्नेन, विदुषा शिववाञ्छता ॥

९

क्व मायाचरणं हीनं, क्व सन्मार्गपरिग्रहः ।
नापवर्गपथि भ्रातः! सञ्चरन्तीह वञ्चकाः ॥


५७

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



१०

व्रती निश्शल्य एव स्यात्सशल्यो व्रतघातकः ।
माया शल्यं मतं साक्षात् सूरिभिर्भूरिभीतिदम् ॥

११

छाद्यमानमपि प्रायः कुकर्म स्फुटति स्वयम् ।
अलं मायाप्रपञ्चेन, लोकद्वयविरोधिना ॥

१२

बकवृत्तिं समालम्ब्य वञ्चकैर्वञ्चितं जगत् ।
कौटिल्यकुशलैः पापैः प्रसन्नं कश्मलाशयैः ॥

## दम्भ ।

१

जटाभारविनिर्युक्ता, दांभिका वेषधारिणः ।
भ्रमन्ति ज्ञानिवल्लोके, भ्रामयन्ति जनानपि ॥

२

मृद्भस्मोद्धूलनादेव, मुक्ताः स्युर्यदि मानवाः ।
मृद्भस्मवासी नित्यं श्वा, स किं मुक्तो भविष्यति ॥

३

तृणपर्णोदकाहाराः सततं वनवासिनः ।
जम्बुकाखुमृगाद्याश्च, तापसास्ते भवन्ति किम् ॥

४

आजन्ममरणान्तं च गङ्गादितटिनीस्थिताः ।
मण्डूका मत्स्यप्रमुखा योगिनस्ते भवन्ति किम् ॥

५

पारावता शिलाहाराः, कदाचिदपि चातकाः ।
न पिबंति महीतोयं, व्रतिनस्ते भवन्ति किम् ॥

६

यस्य चित्तं द्रवीभूतं, कृपया सर्वजीवेषु ।
तस्य ज्ञानं च मोक्षश्च, किं जटाभस्मचीवरैः ॥

७

षट्दर्शनमहाकूपे, पतिताः पशवः खगाः ।
परमार्थं न जानन्ति, पशुपाशनियन्त्रिताः ॥

८

इदं ज्ञानमिदं ज्ञेयमिति, चिंतासमाकुलाः ।
पठन्त्यहर्निशं शास्त्रं, परतत्त्वपराङ्मुखाः ॥

९

स्वस्ववर्णाश्रमाचारनिरताः सर्वमानवाः ।
न जानन्ति परं तत्त्वं, वृथा नश्यन्ति दांभिकाः ॥

१०

न वेदं वेद इत्याहुर्वेदो वेदे न विद्यते ।
परात्मा विद्यते येन, स वेदो वेद उच्यते ॥

## लोभ ।

१

लोभमूलानि पापानि, रसमूलानि व्याधयः ।
स्नेहमूलानि दुःखानि, त्रीणि त्यक्त्वा सुखी भव ॥

२

गुरवो यत्र पूज्यंते, वित्तं यत्र नयार्जितं ।
अदन्तकलहो यत्र, तत्र शक्र ! वसाम्यहम् ॥

३

द्यूतपोषी निजद्वेषी, धातुर्वादी सदालसः ।
आयव्ययमनालोची तत्र तिष्ठाम्यहं हरे ॥

४

अति लोभो न कर्तव्यो, लोभो नैव च नैव च ।
अति लोभाभिभूतात्मा, सागरः सागरं गतः ॥

५

जनकः सर्वदोषाणां, गुणग्रसनराक्षसः ।
कंदो व्यसनवल्लीनां, लोभः सर्वार्थबाधकः ॥

६

विषयैः किं परित्यक्तैर्जागर्ति ममता यदि ।
त्यागात् कंचुकमात्रस्य, भुजङ्गो न हि निर्विषः ॥

५८

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

७

तृप्तं न चक्षुःप्रियदर्शनेन, तृप्तो न राजा धनसंचयेन ।
तृप्तः समुद्रो न महानदीभिः, तृप्तः सुधीमान् न सुभाषितेन ॥

८

अर्था हसन्त्युचितदानविहीनलुब्धं,
भूम्यो हसन्ति मम भूमिरिति ब्रुवाणम् ।
जारा हसन्ति तनयानुपलालयन्तं,
मृत्युर्हसत्यवनिपं रणरंगभीरुम् ॥

९

यौवनं जरया ग्रस्तमारोग्यं व्याधिभिर्हतम् ।
जीवितं मृत्युरभ्येति, तृष्णैका निरुपद्रवा ॥

१०

लोभात्क्रोधः प्रभवति, लोभात्कामः प्रजायते ।
लोभान्मोहश्च नाशश्च, लोभः पापस्य कारणम् ॥

११

एकं दृष्ट्वा शतं दृष्ट्वा, दृष्ट्वा पञ्चशतान्यपि ।
अतिलोभो न कर्तव्यश्चक्रं भ्रमति मस्तके ॥

१२

लोभमूलानि पापानि, लाभाल्लोभो विवर्धते ।
त्रिमाषघटितं कार्यं, त्रिकोट्यापि न पूर्यते ॥

१३

लोभश्चेदगुणेन किं पिशुनता यद्यस्ति किं पातकैः ।
सत्यं चेत्तपसा च किं शुचिमनो यद्यस्ति तीर्थेन किम् ॥
सौजन्यं यदि किं गुणैः सुमहिमा यद्यस्ति किं मण्डनैः ।
सद्विद्या यदि किं धनैरपयशो यद्यस्ति किं मृत्युना ॥

१४

शेते नित्यं शटितपटके मंचके भग्नपादे ।
भुङ्क्ते स्तोकं तदपि कुथितं जीर्णमन्नं क्षुधार्तः ॥
धत्ते शीर्णं मलमलिनतरं वस्त्रखण्डं च कथ्या—
मेवं लोभी द्रविणमधिकं प्रत्यहं संचिनोति ॥

१५

वस्त्राणि सीव्यति तनोति विचित्रचित्रं,
मृत्काष्ठलोहकनकादिविधिं चिनोति ।
नृत्यं करोति रजकत्वमुपैति मर्त्यः,
किं किं न लोभवशवर्तितया विधत्ते ॥

१६

चक्रेशकेशवहलायुधभूतितोऽपि,
संतोषमुक्तमनुजस्य न तृप्तिरस्ति ।
तृप्तिं विना न सुखमित्यवगम्य सम्यक्,
लोभग्रहस्य वशिनो न भवन्ति धीराः ॥

१७

सूच्यग्रेण सुतीक्ष्णेन, भिद्यते या हि मेदिनी ।
तदर्धं तु न दास्यामि, विना युद्धेन केशव ! ॥

१८

लोभादेव नरा मूढा धनविद्याऽन्विता अपि ।
अकृत्येषु नियोज्यन्ते, भ्राम्यन्ते दुर्गमेष्वपि ॥

१९

संगात् संजायते गृद्धिर्गृद्धो वांछति संचयम् ।
संचयात् वर्धते लोभो, लोभात्संसृतिवर्धनम् ॥

२०

लोभेन बुद्धिश्चलति, लोभो जनयते तृषाम् ।
तृषार्त्तो दुःखमाप्नोति, परत्रेह च मानवः ॥

२१

वर्धस्व जीव जय नन्द विभो चिरं त्व—
मित्यादिचाटुवचनानि विभाषमाणः ।
दीनाननो मलिननिंदितरूपधारी,
लोभाकुलो वितनुते सधनस्य सेवाम् ॥

२२

यद् दुर्गामटवीमटन्ति विकटं क्रामन्ति देशान्तरं ।
गाहन्ते गहनंसमुद्रमतनुक्लेशां कृषिं कुर्वते ॥



For Private And Personal Use Only

सेवन्ते कृपणां पतिं गजघटासंघट्टदुस्सञ्चरं ।
सर्पन्ति प्रधनं धनान्धितधियस्तल्लोभविस्फूर्जितम् ॥

२३

दिनयामिन्यौ सायं प्रातः, शिशिरवसन्तौ पुनरायातः ।
कालः क्रीडति गच्छत्यायुः, तदपि न मुञ्चत्याशावायुः ॥

२४

आशा हि लोकान् बध्नाति, कर्मणा बहुचिंतया ।
आयुः क्षयं न जानासि, तस्माज्जागृत जागृत ॥

२५

भूशय्या भैक्षमशनं, जीर्णं वासो वनं गृहम् ।
तथाऽपि निःस्पृहस्याहो, चक्रिणोऽप्यधिकं सुखम् ॥

२६

हृदयं दह्यतेऽत्यर्थं, तृष्णाऽग्निपरितापितम् ।
न शक्यं शमनं कर्तुं, विना संतोषवारिणा ॥

२७

सर्वेषामपि पापानां, निमित्तं लोभ एव हि ।
चातुर्गतिकसंसारे, भूयो भ्रमनिबन्धनम् ॥

२८

संसारसरणिर्लोभो, लोभः शिवपथाचलः ।
सर्वदुःखखनिर्लोभो, लोभो व्यसनमन्दिरम् ॥

२९

लोभः प्रतिष्ठा पापस्य, प्रसूतिर्लोभ एव च ।
द्वेषक्रोधादिजनको, लोभः पापस्य कारणम् ॥

३०

आकरः सर्वदोषाणां, गुणग्रसनराक्षसः ।
कन्दो व्यसनवल्लीनां, लोभः सर्वार्थबाधकः ॥

३१

अहो लोभस्य साम्राज्य—मेकच्छत्रं महीतले ।
तरवोऽपि निधिं प्राप्य, पादैः प्रच्छादयन्ति यत् ॥

३२

प्राप्योपशान्तमोहत्वं, क्रोधादिविजये सति ।
लोभांशमात्रदोषेण, पतन्ति यतयोऽपि हि ॥

३३

सर्पोऽनिष्टोऽथवा लोभो, द्वयोर्लोभस्त्वनिष्टकः ।
दशेच्च मर्दितः सर्पो, लोभो दशति सर्वदा ॥

३४

न सहस्राद्भवेत्तुष्टिर्न, लक्षान्न च कोटिभिः ।
न राज्यान्न च देवत्वान्नेन्द्रत्वादपि देहिनाम् ॥

३५

आकांक्षितानि जन्तूनां, संपद्यन्ते यथा यथा ।
तथा तथा विशेषाप्तौ, मनो भवति दुःखितम् ॥

३६

इच्छति शती सहस्रं, सहस्री लक्षमीहते ।
लक्षाधिपस्ततो राज्यं, राज्याच्च स्वर्गमीहते ॥

## तृष्णा ।

१

आशा हि परमं दुःखं, नैराश्यं परमं सुखम् ।
यथा संछिद्य कान्ताशां, सुखं सुष्वाप पिङ्गला ॥

२

कामकिङ्करतां प्राप्य, जनो नो कस्य किङ्करः ।
एकं कामं परित्यज्य, जनोऽसौ कस्य किङ्करः ॥

३

ते धन्या पुण्यभाजस्ते, तैस्तीर्णः क्लेशसागरः ।
जगत्संमोहजननी, यैराशाऽऽशीविषी जिता ॥

४

आशाया ये दासास्ते, दासाः सर्वलोकस्य ।
आशा येषां दासी, तेषां दासायते लोकः ॥

५

अङ्गं गलितं पलितं मुण्डं, दशनविहीनं जातं तुण्डम् ।
वृद्धो याति गृहीत्वा दण्डं, तदपि न मुञ्चत्याशापिण्डम्

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



६

उत्खातं निधिशङ्कया क्षितितलं ध्माता गिरेर्धातवो ।
निस्तीर्णः सरितां पतिर्नृपतयो यत्नेन सन्तोषिताः ॥
मन्त्राराधनतत्परेण मनसा नीताः श्मशाने निशाः ।
प्राप्तः काणवराटकोऽपि न मया तृष्णेऽधुना मुञ्च माम् ॥

७

भ्रान्तं देशमनेकदुर्गविषमं प्राप्तं न किञ्चित्फलं ।
त्यक्त्वा जातिकुलाभिमानमुचितं सेवा कृता निष्फला ॥
भुक्तं मानविवर्जितं परगृहेष्वाशङ्कया काकवत् ।
तृष्णे ! जृम्भसि पापकर्मनिरते ! नाद्यापि संतुष्यसि ॥

८

निःस्वो वष्टि शतं शती दशशतं लक्षं सहस्राधिपो ।
लक्षेशः क्षितिराजतां क्षितिपतिश्चक्रेशतां वाञ्छति ॥
चक्रेशः सुरराजतां सुरपतिर्ब्रह्मास्पदं वाञ्छति ।
ब्रह्मा विष्णुपदं हरिः शिवपदं तृष्णाऽवधिं को गतः ॥

९

बद्धो हि को ? यो विषयानुरागी,
को वा विमुक्तो ? विषये विरक्तः ।
को वास्ति घोरो नरकः ? स्वदेह-
स्तृष्णाक्षयः स्वर्गपदं किमस्ति ? ॥

१०

को वा दरिद्रो हि ? विशालतृष्णः,
श्रीमांश्च को ? यस्य समस्ति तोषः ।
जीवन्मृतो कस्तु ? निरुद्यमो यः,
का वाऽमृता स्यात् ? सुखदा निराशा ॥

११

षडेतानि न पूर्यंते, पूर्यमाणान्यनेकशः ।
ब्राह्मणोऽग्निर्यमो राजा, पयोधिरुदरं गृहम् ॥

१२

पतन्ति खड्गधारासु, विशन्ति मकरालयम् ।
किं न कुर्वन्ति सुभगे कष्टमर्थार्थिनो जनाः ॥

१३

तृष्णा हि सर्वपापिष्ठा, नित्योद्वेगकरी स्मृता ।
अधर्मबहुला चैव, घोरा पापानुबन्धिनी ॥

१४

बलिभिर्मुखमाक्रान्तं, पलितैरङ्कितं शिरः ।
गात्राणि शिथिलायन्ते, तृष्णैका तरुणायते ॥

१५

च्युता दन्ताः सिताः केशा, दृङ्निरोधः पदे पदे ।
पातसज्जमिमं देहं, तृष्णा साध्वी न मुञ्चति ॥

१६

न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते ॥

१७

धनेषु जीवितव्येषु स्त्रीषु भोजनवृत्तिषु ।
अतृप्ता मानवाः सर्वे याता यास्यन्ति यान्ति च ॥

१८

यावती यावती जन्तोरिच्छोदेति यथा यथा ।
तावती तावती दुःखबीजमुष्टिः प्ररोहति ॥

१९

हते भीष्मे हते द्रोणे, कर्णे च त्रिदिवं गते ।
आशा बलवती राजन् !, शल्यो जेष्यति पाण्डवान् ॥

२०

परस्पृहा महादुःखं, निःस्पृहत्वं महासुखम् ।
एतदुक्तं समासेन लक्षणं सुखदुःखयोः ॥

२१

अज्ञानेनावृतो लोकस्तमसा न प्रकाशते ।
लोभात्त्यजति मित्राणि सङ्गात्स्वर्गं न गच्छति ॥

२२

असुरसुरवराणां यो न भोगेषु तृप्तः,
कथमपि मनुजानां तस्य भोगेषु तृप्तिः ? ।

६१

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जलनिधिजलपाने यो न जातो वितृष्ण-
स्तृणशिखरगताम्भःपानतः किं स तृप्येत्? ॥

२३

भोगा न भुक्ता वयमेव भुक्ता-
स्तपो न तप्तं वयमेव तप्ताः ।
कालो न यातो वयमेव याता-
स्तृष्णा न जीर्णा वयमेव जीर्णाः ॥

२४

जीर्यन्ति जीर्यतः केशाः दन्ता जीर्यन्ति जीर्यतः ।
जीर्येते चक्षुषी श्रोत्रे, तृष्णैका तरुणायते ॥

२५

आशादासस्तु यो जातो, दासस्त्रिभुवनस्य सः ।
आशा दासीकृता येन, तस्य दास्ये जगत्त्रयी ॥

२६

को वा वित्तं समादाय, परलोकं गतः पुमान् ।
येन तृष्णाग्निसंतप्तः, कर्म बध्नाति दारुणम् ॥

२७

भुक्त्वाऽप्यनंतशो भोगान्, देवलोके यथेप्सितान् ।
यो हि तृप्तिं न संप्राप्तः, स किं प्राप्स्यति साम्प्रतम्? ॥

२८

तृष्णाऽन्धा नैव पश्यन्ति, हितं वा यदि वाऽहितम् ।
संतोषाञ्जनमासाद्य, पश्यन्ति सुधियो जनाः ॥

२९

आशैव मदिराऽक्षाणामाशैव विषमञ्जरी ।
आशामूलानि दुःखानि, प्रभवन्तीह देहिनाम् ॥

३०

आशामपि न सर्पन्तीं यः क्षणं रक्षितुं क्षमः ।
तस्यापवर्गसिद्ध्यर्थं वृथा मन्ये परिश्रमम् ॥

३१

ग मज्जति मनो येषामाशाऽम्भसि दुरुत्तरे ।
तेषामेव जगत्यस्मिन्फलितो ज्ञानपादपः ॥

३२

विषयविपिनवीथीसंकटे पर्यटन्ती,
झटिति घटितवृद्धिः क्वापि लब्धावकाशा ।
अपि नियमिनरेन्द्रानाकुलत्वं नयन्ती,
छलयति खलु कं वा नेयमाशापिशाची ॥

## संतोषः ।

१

सर्वत्रसंपदस्तस्य, सन्तुष्टं यस्य मानसम् ।
उपानद्गूढपादस्य, ननु चर्मावृतैव भूः ॥

२

अकिञ्चनस्य दान्तस्य, शान्तस्य समचेतसः ।
सदा सन्तुष्टमनसः, सर्वाः सुखमयाः दिशः ॥

३

अकिञ्चनोऽप्यसौ जन्तुः, साम्राज्यसुखमश्नुते ।
आधिव्याधिविनिर्मुक्तं, सन्तुष्टं यस्य मानसम् ॥

४

अन्तो नास्ति पिपासायाः, संतोषः परमं सुखम् ।
तस्मात्सन्तोषमेवेह, परं पश्यन्ति पण्डिताः ॥

५

न योजनशतं दूरं, बाध्यमानस्य तृष्णया ।
सन्तुष्टस्य करप्राप्तेऽप्यर्थे भवति नादरः ॥

६

वृत्यर्थं नाति चेष्टेत, सा हि धात्रैव निर्मिता ।
गर्भादुत्पतिते जन्तौ, मातुः प्रस्रवतः स्तनौ ॥

७

संतोषं परमास्थाय, सुखार्थी संयतो भवेत् ।
सन्तोषमूलं हि सुखं, दुःखमूलं विपर्ययः ॥

८

सन्तोषैश्वर्यसुखिनां, दूरे दुर्गतिभूमयः ।
भोगाशापाशबद्धानामवमानाः पदे पदे ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

९

सन्तोषस्त्रिषु कर्तव्यः, स्वादाने भोजने धने ।
त्रिषु चैव न कर्तव्यो, दाने तपसि पाठने ॥

१०

सर्पाः पिबन्ति पवनं न च दुर्बलास्ते,
शुष्कैस्तृणैर्वनगजा बलिनो भवन्ति ।
रूक्षाशनेन मुनयः क्षपयन्ति कालं,
सन्तोष एव पुरुषस्य परं निधानम् ॥

११

सन्तोषः परमो लाभः सत्सङ्गः परमा गतिः ।
विचारः परमं ज्ञानं, शमो हि परमं सुखम् ॥

१२

तुष्टो हि राजा यदि सेवकेभ्यो,
भाग्यात्परं नैव ददाति किंचित् ।
अहर्निशं वर्षति वारिवाह-
स्तथापि पत्रत्रितयः पलाशः ॥

१३

तृणं ब्रह्मविदः स्वर्गस्तृणं शूरस्य जीवनम् ।
जिताक्षस्य तृणं नारी, निस्पृहस्य तृणं जगत् ॥

१४

उदारस्य तृणं वित्तं, शूरस्य मरणं तृणम् ।
विरक्तस्य तृणं भार्या, निस्पृहस्य तृणं जगत् ॥

१५

आशैव राक्षसी पुंसामाशैव विषमञ्जरी ।
आशैव जीर्णमदिरा, नैराश्यं परमं सुखम् ॥

१६

पितृ–पूर्वार्जिता भूमिर्दरिद्रापि सुखावहा ।
अपि स्वर्णमयी लङ्का, न मे लक्ष्मण ! रोचते ॥

१७

सौमित्रिर्वदति विभीषणाय लङ्का,
देहि त्वं भुवनपते विनैव कोशम् ।
एतस्मिन् रघुपतिराह वाक्यमेतत्,
विक्रीते करिणि किमङ्कुशे विवादः ॥

१८

किमिह परमसौख्यं ? निःस्पृहत्वं यदेतत्,
किमथ परमदुःखं ? सस्पृहत्वं यदेतत् ।
इति मनसि विधाय त्यक्तसंगाः सदा ये,
विदधति जिनधर्मं ते नरा पुण्यवन्तः ॥

१९

क्रोधो वैवस्वतो राजा तृष्णा वैतरणी नदी ।
विद्या कामदुधा धेनुः सन्तोषो नन्दनं वनम् ॥

२०

सुखमापतितं सेव्यं दुःखमापतितं तथा ।
चक्रवत्परिवर्तन्ते दुःखानि सुखानि च ॥

२१

संतोषः परमं सौख्यं, संतोषः परमामृतम् ।
संतोषः परमं पथ्यं, संतोषः परमं हितम् ॥

२२

मासे मासे हि ये बालाः, कुशाग्रेणैव भुञ्जते ।
संतुष्टोपासकानां ते, कलां नार्हन्ति षोडशीम् ॥

## राग-द्वेष ।

१

इच्छा मूर्च्छा कामः, स्नेहो गार्ध्यं ममत्वमभिनन्दः ।
अभिलाष इत्यनेकानि, रागपर्यायवचनानि ॥

२

दृष्टिरागो महामोहो, दृष्टिरागो महाभवः ।
दृष्टिरागो महामारो, दृष्टिरागो महाज्वरः ॥


६३

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

३

रागान्धो हि जनः सर्वो न पश्यति हिताहितम् ।
रागं तस्मान्न कुर्वीत. यदीच्छेदात्मनो हितम् ॥

४

स्वस्वकर्मकृतावेशाः, स्वस्वकर्मभुजो नराः ।
न रागं नापि च द्वेषं, मध्यस्थस्तेषु गच्छति ॥

५

रे रे चित्त कथं भ्रातः, प्रधावसि पिशाचवत् ।
अभिन्नं पश्य चात्मानं, रागत्यागात्सुखी भव ॥

६

ममत्वाज्जायते लोभो, लोभाद्रागश्च जायते ।
रागाच्च जायते द्वेषो, द्वेषाद् दुःखपरंपरा ॥

७

रागद्वेषवशीभूतो, जीवोऽनर्थपरम्पराम् ।
कृत्वा निरर्थकं जन्म, गमयति यथा यथा ॥

## अभ्याख्यान ।

१

देवेषु किल्बिषो देवो, ग्रहेषु च शनैश्चरः ।
अभ्याख्यानं तथा कर्म, सर्वकर्मसु गर्हितम् ॥



२

काचकामलदोषेण, पश्येन्नेत्रं विपर्ययम् ।
अभ्याख्यानं वदेज्जिह्वा, तत्र रोगः क उच्यते ॥

३

दानं च विफलं नित्यं, शौर्यं तस्य निरर्थकम् ।
पैशून्यं केवलं चित्ते वसेद्यस्याऽयशो भुवि ॥

## जीव स्वरूप ।

१

ज्ञानदर्शनसंपन्न आत्मा चैको ध्रुवो मम ।
शेषा भावाश्च मे बाह्याः, सर्वे संयोगलक्षणाः ॥

२

अच्छेद्योऽयमभेद्योऽयमविकारी स उच्यते ।
नित्यः सततगः स्थाणुरचलोऽयं सनातनः ॥

३

केवलं केवलज्ञानं, प्राप्नुवन्ति स्ववीर्यतः ।
स्ववीर्येणैव गच्छन्ति, जिनेन्द्राः परमं पदम् ॥

४

समस्तलोकाकाशेऽपि, नानारूपैः स्वकर्मतः ।
बालाग्रमिव तन्नास्ति, यन्न स्पृष्टं शरीरिभिः ॥

५

नैनं छिन्दन्ति शस्त्राणि, नैनं दहति पावकः ।
न चैनं क्लेदयन्त्यापो, न शोषयति मारुतः ॥

६

परमानन्दसंपन्नं, निर्विकारं निरामयम् ।
ध्यानहीना न पश्यन्ति, निजदेहे व्यवस्थितम् ॥

७

स्वयमुत्पद्यते जन्तुः स्वयमेव विवर्धते ।
सुखदुःखे तथा मृत्युं स्वयमेवाधिगच्छति ॥

८

शुभाशुभानि कर्माणि, स्वयं कुर्वन्ति देहिनः ।
स्वयमेवोपभुज्यन्ते, दुःखानि च सुखानि च ॥

९

'जले जीवाः स्थले जीवा जीवाः पर्वतमस्तके ।
ज्वालामालाकुले जीवाः सर्वं जीवमयं जगत्' ॥

१०

प्राणा द्वित्रिचतुः प्रोक्ता, भूतानि तरव स्मृताः ।
जीवाः पञ्चेन्द्रिया ज्ञेया, शेषाः सत्त्वा उदीरिताः ॥

११

संसारिणश्चतुर्भेदाः, श्वभ्रतिर्यग्नराऽमराः ।
प्रायेण दुःखबहुलाः, कर्मसम्बन्धबाधिताः ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

१२

नरकेषु देवयोनिषु तिर्यग्योनिषु च मनुजयोनिषु च ।
पर्यटति घटीयन्त्रवदात्मा विभिन्नशरीराणि ॥

१३

विभवश्च शरीरं च, बहिरात्मा निगद्यते ।
तदधिष्ठायको जीवस्त्वन्तरात्मा सकर्मकः ॥

१४

यो न साधयते धर्मं, कामक्रोधौ तदाश्रयौ ।
महामोहविमूढेन, तेनात्मा वंचितो ध्रुवम् ॥

१५

स्वहितं तु भवेज्ज्ञानं, चारित्रं दर्शनं तथा ।
तपः संरक्षणं चैव, सर्वविद्भिस्तदुच्यते ॥

१६

तैलक्षये यथा दीपो, निर्वाणमधिगच्छति ।
कर्मक्षयात् तथा जन्तुः, शरीरान्नाशमृच्छति ॥

१७

संसारी कर्मसंबन्धाद्घटवत् परिभ्राम्यति ।
अनन्तकालपर्यन्तं, जीवः संसारवर्त्मनि ॥

१८

आत्मानं स्नापयेन्नित्यं, ज्ञाननीरेण चारुणा ।
येन निर्मलतां याति, जीवो जन्मान्तरेष्वपि ॥

१९

एकः सदा शाश्वतिको ममात्मा,
विनिर्मलः साधिगमस्वभावः ।
बहिर्भवाः सन्त्यपरे समस्ताः,
न शाश्वताः कर्मभवाः स्वकीयाः ॥

२०

यस्यास्ति नैक्यं वपुषापि सार्द्धं तस्यास्ति किं पुत्रकलत्रमित्रैः
पृथक्कृते चर्मणि रोमकूपाः कुतो हि तिष्ठन्ति शरीरमध्ये

२१

निर्विकारं निराधारं सर्वसंगविवर्जितं ।
परमानंदसंपन्नं शुद्धचैतन्यलक्षणम् ॥

२२

सदानन्दमयं जीवं यो जानाति स पंडितः ।
स सेवते निजात्मानं परमानन्दकारणं ॥

२३

नलिन्यां च यथा नीरं भिन्नं तिष्ठति सर्वदा ।
अयमात्मा स्वभावेन देहे तिष्ठति सर्वदा ॥

२४

अनन्तब्रह्मणो रूपं निजदेहे व्यवस्थितं ।
ज्ञानहीना न पश्यन्ति जात्यन्धा इव भास्करं ॥

२५

लोकमात्रप्रमाणो हि निश्चये न हि संशयः ।
तनूमात्रः व्यवहारो कथयन्ति मुनीश्वराः ॥

२६

द्रव्यकर्मविनिर्मुक्तं भावकर्मविवर्जितं ।
नोकर्मरहितं विद्धि निश्चयेन चिदात्मनः ॥

## पुण्य ।

१

अग्निस्तम्भो जलस्तम्भः, शस्त्रस्तम्भस्तथैव च ।
दुष्टानां दमनं चैव, पुण्यकारस्य दर्शनात् ॥

२

पुण्यमेव भवमर्मदारणं, पुण्यमेव शिवशर्मकारणम् ।
पुण्यमेव हि विपत्तिशामनं, पुण्यमेव जगदेकशासनम् ॥

३

दाने शक्तिः श्रुते भक्तिर्गुरूपास्तिर्गुणे रतिः ।
दमे मतिर्दयावृत्तिः, षडमी सुकृताङ्कुराः ॥

४

सुखमास्से सुखं शेषे, भुङ्क्ते पिवसि खेलसि ।
न जाने त्वग्रतः पुण्यैर्विना ते किं भविष्यति ? ॥


६५

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



५

जैनो धर्मः कुले जन्म, शुभ्रा कीर्तिः शुभा मतिः ।
गुणे रागः श्रियां त्यागः, पूर्वपुण्यैरवाप्यते ॥

६

परोपकारकरणात्, पापमुज्जृम्भते सताम् ।
पुण्यं हि सर्वसंपत्तिवशीकरणकारणम् ॥

७

जन्मिनां पूर्वजन्माप्तभाग्यमन्त्राभिमन्त्रितः ।
अचेतनोऽपि वश्यः स्यात्, किं पुनर्यः सचेतनः? ॥

८

जैनो धर्मः प्रकटविभवः सङ्गतिः साधुलोके ।
विद्वद्गोष्ठिर्वचनपटुता, कौशलं सत्क्रियासु ॥
साध्वी लक्ष्मीश्चरणकमलोपासनं सद्गुरूणां ।
शुद्धं शीलं सुमतिरमला प्राप्यते नाल्पपुण्यैः ॥

९

पत्नी प्रेमवती सुतः सविनयो भ्राता गुणालङ्कृतः ।
स्निग्धो बन्धुजनः सखाऽति चतुरो नित्यं प्रसन्नः प्रभुः ॥
निर्लोभोऽनुचरः स्वबन्धुसुमुनिप्रायोपयोग्यं धनं ।
पुण्यानामुदयेन सन्ततमिदं कस्यापि सम्पद्यते ॥

१०

तावच्चन्द्रबलं ततो ग्रहबलं ताराबलं भूबलं ।
तावत्सिध्यति वाञ्छितार्थमखिलं तावज्जनः सज्जनः ॥
विद्यामण्डलमन्त्रतन्त्रमहिमा तावत्कृतं पौरुषम् ।
यावत्पुण्यमिदं नृणां विजयते पुण्यक्षये क्षीयते ॥

## पाप ।

१

पापबुद्ध्या भवेत् पापं, को मुग्धोऽपि न वेत्त्यदः? ।
धर्मबुद्ध्या तु यत् पापं, तच्चिन्त्यं निपुणैर्बुधैः ॥

२

न स मन्त्रो न सा बुद्धिर्न स दोष्णां पराक्रमः ।
अपुण्योपस्थितं येन, व्यसनं प्रतिरुध्यते ॥

३

भवेयुः प्राणिनः पापात्, कासश्वासज्वरादयः ।
सखायोऽपि कदर्याश्च, नागश्रीवन्महीतले ॥

४

अमृतं कालकूटं स्यात्, मित्रं शत्रुः सुधीरधीः ।
सज्जनो दुर्जनः पापाद्विपरीतं फलं त्विह ॥

५

एकस्य जन्मनोऽर्थे मूढाः, कुर्वन्ति यानि पापानि ।
जनयन्ति तानि दुःखं, तेषां जन्मान्तरसहस्रम् ॥

६

हिंसाऽनृतादयः पञ्च, तत्त्वाश्रद्धानमेव च ।
क्रोधादयश्च चत्वार इति पापस्य हेतवः ॥

७

श्रीब्रह्मदत्तो नरचक्रवर्ती,
मृत्वा गतः सोऽपि हि सप्तमीं च ।
निर्गत्य तस्माद्भवपङ्कमग्नः,
तत्रापि हेतुः किल पातकस्य ॥

८

बन्धुर्वैरिजनायते गुणवती कान्ता च सर्पायते ।
मित्रं चापि खलायते गुणनिधिः पुत्रोऽप्यमित्रायते ॥
श्रीखण्डं दहनायते श्रवणयोः सूक्तं तु शूलायते ।
जाते पुण्यविपर्यये तनुभृतामर्थोऽप्यनर्थायते ॥

९

जीवितं यस्य धर्मार्थं, धर्मो ज्ञानार्थमेव च ।
ज्ञानं च ध्यानयोगार्थं, सर्वपापैः स मुच्यते ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

## संवर ।

१

सर्वेषामास्रवाणां तु, निरोधः संवरः स्मृतः ।
स पुनर्भिद्यते द्वेधा, द्रव्यभावविभेदतः ॥

२

यः कर्मपुद्गलादानच्छेदः स द्रव्यसंवरः ।
भवहेतुक्रियात्यागः, स पुनर्भावसंवरः ॥

३

सर्वेषामास्रवाणां यो रोधहेतुः स संवरः ।
कर्मणां भवहेतूनां, जरणादिह निर्जरा ॥

४

विहाय कल्पनाजालं स्वरूपे निश्चलं मनः ।
यदाधत्ते तदैव स्यान्मुनेः परमसंवरः ॥

५

सकलसमितिमूलः संयमोद्दामकाण्डः,
प्रशमविपुलशाखो धर्मपुष्पावकीर्णः ।
अविकलफलबन्धैर्बन्धुरो भावनाभि—
र्जयति जितविपक्षः संवरोद्दामवृक्षः ॥

## मनः ।

१

चक्षुःपूतं न्यसेत्पादं, वस्त्रपूतं जलं पिबेत् ।
सत्यपूतां वदेद्वाणीं, मनःपूतं समाचरेत् ॥

२

मनो मधुकरो मेघो, मानिनी मदनो मरुत् ।
मा मदो मर्कटो मत्स्यो, मकारा दश चञ्चलाः ॥

३

मनसैव कृतं पापं, न शरीरकृतम् कृतम् ।
येनैवालिङ्गिता कान्ता, तेनैवालिङ्गिता सुता ॥

४

मन एव मनुष्याणां, कारणं बंधमोक्षयोः ।
सप्तम्यां क्षणके यान्ति, जीवास्तण्डुलमत्स्यवत् ॥

५

वशं मनो यस्य समाहितं स्यात्,
किं तस्य कार्यं नियमैर्यमैश्च ।
हतं मनो यस्य च दुर्विकल्पैः,
किं तस्य कार्यं नियमैर्यमैश्च ॥

६

दानं श्रुतध्यानतपोऽर्चनादि,
वृथा मनो निग्रहमन्तरेण ।
कषायचिन्ताकुलतोज्झितस्य,
परो हि योगो मनसो वशत्वम् ॥

७

योगस्य हेतुर्मनसः समाधिः,
परं निदानं तपसश्च योगः ।
तपश्चमूलं शिवशर्मवल्याः—
मनःसमाधिं भज तत्कथञ्चित् ॥

८

स्वाध्याययोगैश्चरणं क्रियासु—
व्यापारणैर्द्वादशभावनाभिः ।
सुधीस्त्रियोगी सदसत्प्रवृत्ति—
फलोपयोगैश्च मनो निरुंध्यात् ॥

९

मनः संवृणु हे विद्वन्!, असंवृतमना यतः ।
याति तंदुलमत्स्यो द्राक् सप्तमीं नरकावनीम् ॥

१०

मन एव मनुष्याणां, कारणं बंधमोक्षयोः ।
बंधाय विषयासक्तं, मुक्त्यै निर्विषयं स्मृतम् ॥

११

मनोयोगो बलीयांश्च, भाषितो भगवन्मते ।
यः सप्तमीं क्षणार्धेन, नयेद्वा मोक्षमेव च ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

१२

वपुः कुब्जीभूतं गतिरपि तथा यष्टिशरणा ।
विशीर्णा दन्ताली श्रवणविकलं श्रोत्रयुगलम् ॥

१३

शिरः शुक्लं चक्षुस्तिमिरपटलैरावृतमहो ।
मनो मे निर्लज्जं तदपि विषयेभ्यः स्पृहयति ॥

१४

रात्रिर्गमिष्यति भविष्यति सुप्रभातं ।
भास्वानुदेष्यति हसिष्यति पंकजश्रीः ॥
एवं विचिन्तयति कोशगते द्विरेफे ।
हा हन्त हन्त नलिनीं गज उज्जहार ॥

१५

आत्मानं रथिनं विद्धि, शरीरं रथमेव तु ।
बुद्धिन्तु सारथिं विद्धि, मनः प्रग्रहमेव च ॥

१६

ज्ञानं तीर्थं धृतिस्तीर्थं, पुण्यं तीर्थमुदाहृतम् ।
तीर्थानामपि तत्तीर्थं, विशुद्धिर्मनसः परा ॥

१७

सुखाय दुःखाय च नैव देवा,
न चापि कालः सुहृदोऽरयो वा ।
भवेत्परं मानसमेव जन्तोः,
संसारचक्रभ्रमणैकहेतुः ॥

१८

सुकरं मलधारित्वं, सुकरं दुस्तपं तपः ।
सुकरोऽक्षनिरोधश्च, दुष्करं चित्तरोधनम् ॥

१९

मनो हि जगतां कर्तृ, मनो हि पुरुषः स्मृतः ।
मनःकृतं कृतं लोके, न शरीरकृतं मतम् ॥

२०

मनःकपिरयं विश्वपरिभ्रमणलम्पटः ।
नियन्त्रणीयो यत्नेन, मुक्तिमिच्छुभिरात्मनः ॥

२१

चञ्चलं हि मनः कृष्ण !, प्रमाथि बलवद् दृढम् ।
तस्याहं निग्रहं मन्ये, वायोरिव सुदुष्करम् ॥

२२

असंशयं महाबाहो !, मनो दुर्निग्रहं चलम् ।
अभ्यासेन तु कौन्तेय !, वैराग्येण च गृह्यते ॥

२३

मानसं प्राणिनामेव, सर्वकर्मैककारणम् ।
मनोरूपं हि वाक्यं च, वाक्येन प्रस्फुटं मनः ॥

२४

अन्तश्चित्तं न चेच्छुद्धं, बहिः शौचे न शौचभाक् ।
सुपक्वमपि निम्बस्य, फलं बीजे कटु स्फुटम् ॥

२५

दानं पूजा तपश्चैव, तीर्थसेवा श्रुतं तथा ।
सर्वमेव वृथा तस्य, यस्य शुद्धं न मानसम् ॥

२६

चित्तं रागादिभिः क्लिष्टमलीकवचनैर्मुखम् ।
जीवहिंसादिभिः कायो, गङ्गा तस्य पराङ्मुखी ॥

२७

सत्येन शुध्यते वाणी, मनो ज्ञानेन शुध्यति ।
गुरुशुश्रूषया कायः, शुद्धिरेषा सनातनी ॥

२८

जपो न मुक्त्यै न तपो द्विभेदं,
न संयमो नापि दमो न मौनम् ।
न साधनाद्यं पवनादिकस्य,
किं त्वेकमन्तःकरणं सुदान्तम् ॥

२९

रे चित्त वैरि तव किं नु मयापराद्धं,
यद् दुर्गतौ क्षिपसि मां कुविकल्पजालैः ।



For Private And Personal Use Only

जानासि मामयमपास्य शिवेऽसि गन्ता,
तत्किं न सन्ति तव वासपदं ह्यसंख्याः ॥

१०

अन्तर्गतं महाशल्य-मस्थैर्यं यदि नोद्धृतम् ।
क्रियौषधस्य को दोषस्तदा गुणमयच्छतः ॥

११

प्रसन्नचन्द्रराजर्षेर्मनःप्रसरसंवरौ ।
नरकस्य शिवस्यापि, हेतुभूतौ क्षणादपि ॥

१२

मनो हि द्विविधं प्रोक्तं, शुद्धं चाशुद्धमेव च ।
अशुद्धं कामसंकल्पं, शुद्धं कामविवर्जितम् ॥

१३

यदि वहसि त्रिदण्डं नग्नमुण्डं जटा वा ।
यदि वससि गुहायां पर्वताग्रे शिलायाम् ॥
यदि पठसि पुराणं वेद सिद्धान्ततत्त्वं ।
यदि हृदयमशुद्धं सर्वमेतन्न किञ्चित् ॥

१४

विद्या हि का ? ब्रह्मगतिप्रदा या,
बोधो हि को ? यस्तु विमुक्तिहेतुः ।
को लाभ ? आत्मात्रगमो हि यो वै,
जितं जगत्केन ? मनो हि येन ॥

१५

पङ्कैर्विना सरो भाति, सभा खलजनैर्विना ।
कटुवर्णैर्विना काव्यं, मानसं विषयैर्विना ॥

## जिह्वा वचन ।

१

जिह्वे ! प्रमाणं जानीहि, भोजने वचने तथा ।
अतिभुक्तमति चोक्तम्, प्राणिनां मरणप्रदम् ॥

२

कण्ठनालिमतिक्रान्तं, सर्वं तदशनं समं ।
क्षणमात्रसुखस्यार्थे, लौल्यं कुर्वीत नो बुधाः ॥

३

न जारजातस्य ललाटशृङ्गं, कुलप्रसूते न च पाणिपद्मं ।
यदा यदा मुञ्चति वाक्यबाणां, तदा तदा तस्य कुलंप्रमाणम् ॥

४

रे जिह्वे ! कटुके स्नेहे, मधुरं किं न भाषसे ।
मधुरं वद कल्याणि, लोकोयं मधुरप्रियः ॥

५

रे जिह्वे ! कुरु मर्यादां, भोजने वचने तथा ।
वचने प्राणसन्देहो, भोजने च ह्यजीर्णता ॥

६

जिह्वायाः खण्डनं नास्ति, तालुको नैव भिद्यते ।
अक्षरस्य क्षयो नास्ति, वचने का दरिद्रता ? ॥

७

न तथा शशी न सलिलं, न चन्दनरसो न शीतला छाया
आह्लादयन्ति पुरुषं, यथा हि मधुराक्षरा वाणी ॥

८

न तथा रिपुर्न शस्त्रं न विषं, न हि दारुणो महाव्याधिः ।
उद्वेजयन्ति पुरुषं, यथा हि कटुकाक्षरी वाणी ॥

९

स्वजिह्वा नो वशे यस्य, जल्पने भोजने तथा ।
स भवेद् दुःखितो नित्यमात्मनो दुष्टचेष्टितैः ॥

१०

दन्तिदन्तसमानं हि, निःसृतं महतां वचः ।
कूर्मग्रीवेव नीचानां, पुनरायाति याति च ॥

११

लक्ष्मीर्वसति जिह्वाग्रे, जिह्वाग्रे मित्रबान्धवाः ।
जिह्वाग्रे बन्धनं प्राप्तं, जिह्वाग्रे मरणं ध्रुवम् ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



१२

असंभवं न वक्तव्यं, प्रत्यक्षमपि दृश्यते ।
शिला तरति पानीयं, गीतं गायति वानरः ॥

१३

जिह्वालौल्यप्रसक्तानां, जलमध्यनिवासिनाम् ।
अचिन्तितो वधोऽज्ञानां, मीनानामिव जायते ॥

१४

अवसरपठिता वाणी, गुणगणरहितापि शोभते पुंसाम् ।
रतिसमये युवतीनां भूषाहानिर्विभूषणं भवति ॥

१५

तावज्जितेन्द्रियो न स्याद्विजितान्येन्द्रियः पुमान् ।
न जयेद्रसनां यावज्जितं सर्वं जिते रसे ॥

१६

आस्वाद्यस्य हि सर्वस्य, जिह्वाग्रे क्षणसङ्गमः ।
कण्ठनाडीमतीतं च, सर्वं, चैवाशनं समम् ॥

१७

अनुद्वेगकरं वाक्यं, सत्यं प्रियहितं च यत् ।
स्वाध्यायाभ्यसनं चैव, वाङ्मयं तप उच्यते ॥

१८

यस्य वाण्यस्ति मधुरा, तस्यैव सफलं तपः ।
नो चेज्जीवन्ति पशवोऽप्यनिशं पुष्टिशालिनः ॥

१९

मदरक्तस्य हंसस्य, कोकिलस्य शिखण्डिनः ।
हरन्ति न तथा वाचो, यथा वाचो विपश्चिताम् ॥

२०

यदीच्छसि वशीकर्तुं, जगदेकेन कर्मणा ।
परापवादशस्येभ्यो, गां चरन्तीं निवारय ॥

२१

अवसरपठिता वाणी, गुणगणरहितापि शोभते पुंसाम् ।
वामे प्रयाणसमये, रासभशब्दोपि मंगलं कुरुते ॥

२२

बाला रोदनं मुञ्चन्ति, क्रोधं मुञ्चन्ति पन्नगाः ।
हरिणः प्राणान्मुञ्चन्ति, नास्ति नादसमो रसः ॥

२३

निरवद्यं वचो ब्रूहि, सावद्यवचनैर्यतः ।
प्रयाता नरकं घोरं, वसुराजादयो द्रुतम् ॥

२४

इहामुत्र च वैराय, दुर्वाचो नरकाय च ।
अग्निदग्धाः प्ररोहन्ति, दुर्विदग्धाः पुनर्न हि ॥

२५

अत एव जिना दीक्षाकालादाकेवलोद्भवम् ।
अवद्यादिभिया ब्रूयुर्ज्ञानत्रयभृतोऽपि न ॥

२६

परस्परस्य मर्माणि, ये भाषन्ते नराधमाः ।
त एव विलयं यान्ति वल्मीकोदरसर्पवत् ॥

२७

अर्थ्यं पथ्यं तथ्यं श्रव्यं मधुरं हितं वचो वाच्यम् ।
विपरीतं मोक्तव्यं जिनवचनविचारकैर्नित्यम् ॥

२८

केयूरा न विभूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वला ।
न स्नानं न विलेपनं न कुसुमं नालंकृता मूर्द्धजाः ॥
वाण्येका समलंकरोति पुरुषं या संस्कृता धार्यते ।
क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम् ॥

२९

परपरिवादः परिषदि न कथञ्चित् पण्डितेन वक्तव्यः ।
सत्यमपि तन्न वाच्यं, यदुक्तमसुखावहं भवति ॥

३०

रोहते शायकैर्विद्धं, वनं परशुनाऽऽहतम् ।
वाचा दुरुक्तं बीभत्सं, नापि रोहति वाक्क्षतम् ॥

३१

वचनं हारितं येन, सुकृतं तेन हारितम् ।
इति मत्वा मया कार्यम्, वाचाया मोचनं ध्रुवम् ॥

७०

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



१२

यदि न दीयते राज्यं, वाक्यं मे याति निश्चितम् ।
यदि वा दीयते राज्यं, रामो निष्काश्यते कथम् ॥

१३

चिन्तातुरः कथं तात !, दृश्यते दुःखितो यथा ।
दुःखस्य कारणं नूनं कथ्यतां वेगतो मम ॥

१४

हसित्वा रामचन्द्रोऽपि, वचनं प्राह पेशलम् ।
एतेन स्वल्पकार्येण, किं दुःखं हि पितुर्मम ॥

१५

लङ्केश्वर ! समागच्छ, कुशलं वर्तते तव ? ।
लङ्कायास्त्वं पदे सत्यं स्थापितोऽसि मया ध्रुवम् ॥

१६

विभीषणोऽपि तं प्राह, महान्तो हि चलन्ति न ।
वाक्यं तु निसृतं वक्त्राद्गजस्यैव रदो यथा ॥

१७

एकमेव महद्दुःखं, स्थितं च मम मानसे ।
विभीषणस्य च यद्राज्यं लङ्काया न समर्पितम् ॥

१८

साधुर्दुष्टः समो ज्ञेयः यावत्किंचिन्न भाषते ।
वसन्तसमये काककोकिलानां हि निर्णयः ॥

१९

प्रस्तावे भाषितं वाक्यं प्रस्तावे दानमंगिनाम् ।
प्रस्तावे वृष्टिरल्पाऽपि, भवेत्कोटिफलप्रदम् ॥

## काया ।

१

पृथिवी दह्यते यत्र, मेरुश्चापि विशीर्यते ।
सुशोषं सागरं नीरं, शरीरे तत्र का कथा ॥

२

पुनर्वित्तं पुनर्मित्रं, पुनर्भार्या पुनर्मही ।
एतत्सर्वं पुनः लभ्यं न शरीरं पुनः पुनः ॥

३

तरङ्गतरलां लक्ष्मीमायुर्वायुवदस्थिरम् ।
बुद्धिमन्तश्च पश्यन्ति, अभ्रवद् भङ्गुरं वपुः ॥

४

प्रस्रवन्नवभिर्द्वारैः, पूतिगन्धाश्चिरन्तरम् ।
क्षणक्षयं पराधीनं, शश्वन्नरकलेवरम् ॥

५

अचला कमला कस्य, कस्य मित्रं महीपतिः ।
शरीरं च स्थिरं कस्य कस्य वश्या वराङ्गना ॥

६

उद्घाटितनवद्वारे, पञ्जरे विहगोऽनिलः ।
यत्तिष्ठति तदाश्चर्यं, प्रयाणे विस्मयः कुतः ॥

७

यत्प्रातः संस्कृतञ्चान्नं, सायं सद्यो विनश्यति ।
तदीयरसनिष्पन्ने, काये का नाम नित्यता ॥

८

सर्वाशुचिनिधानस्य, कृतघ्नस्य विनाशिनः ।
शरीरकस्यापि कृते, मूढाः पापानि कुर्वते ॥

९

जलमग्निर्विषं शस्त्रं, क्षुद्व्याधिः पतनं गिरेः ।
निमित्तं किंचिदासाद्य, देही प्राणान्विमुञ्चति ॥

१०

अमेध्यपूर्णं कृमिजालसङ्कुलं,
स्वभावदुर्गंधमशौचमध्रुवम् ।
कलेवरं मूत्रपुरीषभाजनं,
रमन्ति मूढा न रमन्ति पण्डिताः ॥

११

वासांसि जीर्णानि यथा विहाय,
नवानि गृह्णाति नरोऽपराणि ।
तथा शरीराणि विहाय जीर्णा–
न्यन्यानि संयाति नवानि देही ॥

१२

त्वङ्मांसरुधिरस्नायु-मेदोमज्जाऽस्थिसंहतौ ।
विण्मूत्रपूये रमतां, कृमीणां कियदन्तरम् ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

१३

प्रतिक्षणमयं कायः, क्षीयमाणो न लक्ष्यते ।
आमकुम्भ इवाम्भःस्थो, विशीर्णः सन्निभाव्यते ॥

१४

मांसासृक्पूयविण्मूत्रस्नायुमज्जाऽस्थिसंहतौ ।
देहे चेत्प्रीतिमान्मूढो, भविता नरकेऽपि सः ॥

१५

जीवितं विद्युता तुल्यं, संयोगाः स्वप्नसन्निभाः ।
सन्ध्यारागसमः स्नेहः, शरीरं तृणबिन्दुवत् ॥

१६

संसारे दुःखदावाग्निज्वलज्ज्वालाकरालिते ।
वने मृगार्भकस्येव, शरणं नास्ति देहिनः ॥

१७

अन्यद् वपुरिदं जीवाज्जीवश्चान्यः शरीरतः ।
जानन्नपीति को दक्षः करोति ममतां तनौ ? ॥

१८

जग्ध्वा सुगन्धि ताम्बूलं सुप्तो निश्युत्थितः प्रगे ।
जुगुप्सते वक्त्रगन्धं यत्र तत् किं वपुः शुचि ? ॥

१९

स्वतः सुगन्धयो गन्धधूपपुष्पस्रगादयः ।
यत्सङ्गाद् यान्ति दौर्गन्ध्यं, सोऽपि कायः शुचीयते ॥

२०

दोषधातुमलाकीर्णं, कृमिगण्डूपदास्पदम् ।
रोगभोगिगणैर्ग्रस्तं, शरीरं को वदेत् शुचि ? ॥

२१

सुस्वादून्यन्नपानानि, क्षीरेक्षुविकृती अपि ।
भुक्तानि यत्र विष्टायै, तच्छरीरं कथं शुचि ? ॥

२२

शुक्रशोणितसम्भूतो, मलनिःस्यन्दवर्धितः ।
गर्भे जरायुसंछन्नः, शुचिः कायः कथं भवेत् ? ॥

२३

रसासृग्मांसमेदोऽस्थिमज्जशुक्रान्त्रवर्चसाम् ।
अशुचीनां पदं कायः, शुचित्वं तस्य तत् कुतः ? ॥

२४

न शक्यं निर्मलीकर्तुं, गात्रं स्नानशतैरपि ।
आश्रान्तमिव स्रोतोभिर्नवभिर्मलमुद्गिरत् ॥

२५

वसारुधिरमांसास्थियकृद्विण्मूत्रपूरिते ।
वपुष्यशुचिनिलये, मूर्च्छां कुर्वीत कः सुधीः ? ॥

२६

यत् परित्यज्य गंतव्यं, तत् स्वकीयं कथं भवेत् ? ।
इत्यालोच्य शरीरेऽपि, विद्वानाशां परित्यजेत् ॥

२७

कृमिजालशताकीर्णे, रोगप्रचयपीडिते ।
जराजर्जरिते काये, कीदृशी महतां रतिः ? ॥

२८

यदीदं शोध्यते दैवाच्छरीरं सागराम्बुभिः ।
दूषयत्यपि तान्येवं शोध्यमानमपि क्षणे ॥

२९

कलेवरमिदं न स्याद्यदि चर्मावगुण्ठितम् ।
मक्षिकाकृमिकाकेभ्यः स्यात्त्रातुं कस्तदा प्रभुः ॥

३०

सर्वदैव रुजाक्रान्तं, सर्वदैवाशुचेर्गृहम् ।
सर्वदा पतनप्रायं, देहिनां देहपञ्जरम् ॥

३१

कर्पूरकुङ्कुमागुरुमृगमदहरिचन्दनादि वस्तूनि ।
भव्यान्यपि संसर्गान्मलिनयति कलेवरं नृणाम् ॥

३२

अजिनपटलगूढं पञ्जरं कीकसानाम्,
कुथितकुणपगन्धैः पूरितं मूढ ! गाढम् ।
यमवदननिषण्णं रोगभोगीन्द्रगेहं,
कथमिह मनुजानां प्रीतये स्याच्छरीरम् ॥

॥ संस्कृत-श्लोक संग्रहः प्रथम भाग समाप्तम् ॥


७२

For Private And Personal Use Only